I. C.	अलङ्कारशेखरः	केशवमिश्रः	,,	Printed Benares Edition	,,

अथ अलंकारशेखरः प्रारभ्यते

अ०शे० श्रीगणेशायनमः॥ प्राणेकृशोदरीणांराधानयनान्तसर्वस्वम् तेजस्तमालनीलंशरणागतवज्रपञ्जरम्वन्दे॥१॥स्वप्रकाशचिदानंद
१ मयायपरमात्मने अविद्यानिविडध्वान्तभास्करायनमोन्वहम्॥२॥ग्रन्थाः काव्यकृतांहितायविहितायेसप्तपूर्वैर्मयातेतर्कार्णवसं
प्लवव्यसनिभिः शक्याः परंवेदितुम् इत्यालोच्यहृदामदालसवधूपादारविन्दक्वणन्मञ्जीरध्वनिमञ्जुलोयमधुनाप्रस्तूयतेप्रक्र
मः॥३॥आसीत्प्रत्यर्थिपृथ्वीरमणकमलिनीवृन्दहेमन्तमासः कीर्तिभ्राजत्सुशर्मान्वयकुमुदवनीयामिनीजीवनाथः राजद्राजन्यरा
जीमुकुटमणिगणप्रोल्लसत्पादपीठः प्रोद्यत्साम्राज्यलक्ष्मीशिथिलितनहुषोरामचन्द्रोवनीन्द्रः॥४॥मित्राणिप्रतिपालयंस्त्रिजगतीं
कीर्तीन्दुनाह्लादयन् शत्रूणांहृदयंप्रतापदहनैरात्रिंदिवंज्वालयन् सर्वस्वेनकृतार्थयन्द्विजगणान्देवान्मखैस्तोषयन्नेषप्रौढमनाश्चि
रायषुभुजेसप्तार्णवांमेदिनीम्॥५॥सूत्रामोद्दामदिल्लीपरिवृढविलसत्काविलक्षोणिभर्त्रा प्रक्रान्तेप्रौढयुद्धेसमदलयदसौकोटिशो
वैरिवीरान् पश्चान्मांसास्थिमेदःकलुषितवसुधांप्रेक्ष्यतांश्चाकलय्यद्यांयातान्वैरिवर्गान्दिवमपिसहसाजेतुकामोजगाम॥६॥क्षीरा
म्भोधेः शशीवश्रुतिरिववदनाद्वेधसोरामचन्द्रादस्माद्युत्प्रतापः समजनिसुमनाधर्मचन्द्रोनरेन्द्रः यस्याद्यापिप्रसन्नस्मितसुभग

377,0

मुखाः स्विद्यदच्छकपोलारोमाञ्चस्तंभभव्यास्त्रिदशयुवतयो हन्त गायन्ति कीर्तीः ॥ ७॥ निःक्रान्तं सदनादुदेक्षि भगवानम्भोजिनीवल्ल
भस्सेवाताः परिशीलिताः कमलिनीसौरभ्यमेदस्विनः विश्रान्तं गिरिकाननेषु निविडच्छायेषु भाग्योदयादित्थं स्मेरमुखाः स्तुवन्ति विप
दं यद्वैरिवामभ्रुवः ॥ ८॥ प्रत्यर्थिभूपतिपरिग्रहराज्यलक्ष्मीधम्मिल्लमाल्यसुरभीकृतपाणिपद्मः तस्मादजायत समस्तगुणाभिरामो मा
णिक्यचन्द्र इति राजकचक्रशक्रः ॥ ९॥ काव्यालंकारपारंगममतिरखिलक्ष्माभृतां चक्रवर्ती सर्वेषामस्तु काव्येमतिरतिनिपुणेत्याशयेसन्नि
वेश्य वेदान्तन्यायविद्यापरिचयचतुरं केशवं सन्नियुज्य श्रीमन्माणिक्यचन्द्रः क्षितिपतितिलको ग्रन्थमेनं विधत्ते ॥ १०॥ बहुदोषोऽपि
विशेषः क्रियते सुजनेन वाण इव हरिणा गुणवदपि निर्गुणीक्रियते दुर्जनतो मूषिकात इव पुस्तम् ॥ ११ परोद्वेगे परानन्दे खलसज्जन
योर्द्वयोः स्वभाव एव शरणं विषपीयूषयोरिव ॥ १२॥ अलंकारविद्यासूत्रकारो भगवान् शौद्धोदनिः परमकारुणिकः स्वशास्त्रे प्रवर्त्त
यिष्यन्प्रथमं काव्यस्वरूपमाह ॥ काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत् आदिपदेनालंकारपरिग्रहः ॥ तथा च ॥ तदुभयान्यतर
वत्त्वं वा लक्षणम् अन्यतरवत्त्वं च तदन्यान्यत्वम् सुखविशेषसाधनं वा लक्षणम् समुदायार्थशून्ये पि तदुभयमस्त्येवेति वृद्धाः अद

अ॰शे॰ ष्टद्वारातद्धेतुशब्दः तिव्याप्तेराह श्रुतमितिसदितिशेषः सुखेवैजात्यंसर्वानुभवसिद्धमेव॥केचित्तु॥तददोषौशब्दार्थौसगुणावन
२ लंकृतीपुनःक्वापीत्याहुः रसप्रतिपत्तिगुणद्वारासुखविशेषसाधनंकाव्यमित्यपरे केचित्तुपदावलीकाव्यम् नतुनिर्दोषगुणवदा
दिकाव्यदोषाणामपरिगणनापत्तेः नचदोषाभावघटितकाव्यत्वज्ञानार्थमेवप्रतियोगिपरिगणनमितिवाच्यम् तथैतत्काव्यंदुष्ट
मित्यनुद्भावनापत्तेः इदंकाव्यमेवनेत्यभिधानस्यैवोचितत्वादित्याहुः तन्नतथायंहेतुराभासइतिवदुपपत्तेः व्याप्तिविशिष्टपक्षध
र्मस्यैवहेतुत्वात्नचहेतुत्वेनाभिमतइतिवाच्यम् तुल्यत्वादिति वस्तुतस्तुकाव्यंपृथगेवयत्रदोषेगुणादिचिन्तानहि दुष्टंशरीरंशरीर
मेवनभवतीत्यन्ये कीर्त्यादिरूपफलसाधनतातुविशिष्टस्य॥यदाह॥साधुशब्दार्थसन्दर्भंगुणालंकारभूषितं स्फुटरीतिरसोपेतंका
व्यंकुर्वीतकीर्तये॥आहुश्च॥निर्दोषंगुणवत्काव्यमलंकारैरलङ्कृतम् रसान्वितंकविः कुर्वन्प्रीतिंकीर्तिंचविंदति प्रवृत्त्यौपयिकंफल
माह हितायसुकविःकुर्यात् सुकवेरेवहितमन्यंस्यतुप्रतिकूलमितितन्न॥तदुक्तंच॥गौर्गौःकामदुघासम्यक्प्रयुक्तास्मर्यते
बुधैः दुःप्रयुक्ताःपुनर्गोत्वंप्रयोक्तुःसैवशंसति श्लाघ्यःपामरपरिषदिकवयतिदोलीककर्तापि यस्मैस्पृहयतिविद्वांस्तत्का

ऽंकाव्यमित्याहुः अर्थैः कृतार्थयंत्येके घटनापटवः परे उभयत्रप्रवीणायेतएवकवयोमताः॥ हितमाह श्रीपादः॥ लाभःपूजा
ख्यातिर्धर्मः कामश्चमोक्षश्चइष्टानिष्टप्राप्तित्यागौज्ञानंफलानिकाव्यस्यदृष्टेतिगोरषन्यायात्॥ आहुश्च॥ काव्यंयशसेर्थकृतेव्यव
हारविदेशिवेतरक्षतये सद्यःपरनिर्वृतयेकान्तासंमिततयोपदेशयुजे॥ रुद्रास्तु॥ श्रोतृणांद्रागमहानंदः सः स्वस्मिन्नाभिमानिकः
तत्कालफलमेतावत्कमात्कीर्तिधनादिकं नन्वेवंसर्वः सुकविरेवस्यात् अतआहतद्धेतुः प्रतिभादिकम्॥ तदाह॥ प्रतिभाका
रणंतस्यव्युत्पत्तिस्तुविभूषणम् भृशोत्पत्तिकृदभ्यासः काव्यस्यैषाव्यवस्थितिः व्युत्पत्तिर्नानातंत्रज्ञानम्॥ आहुश्च॥ शक्तिर्निपु
णतालोकशास्त्रकाव्याद्यवेक्षणात् काव्यज्ञशिक्षयाभ्यासइतिहेतुस्तदुद्भवे शक्तिः पुण्यविशेषः सएवप्रतिभेत्युच्यते व्युत्प
त्तिः शक्तिरभ्यासस्त्रितयंकाव्यसाधनमित्यपि॥ श्रीपादस्तु॥ परिशीलितकाव्यवर्त्मनांकविसंसर्गविशुद्धचेतसां परिभावयता
मनुसर्णंकवितापाणितलेनिषीदतिनैसर्गिकीचप्रतिभाश्रुतंचवहुनिर्मलम् अमन्दश्चाभियोगोऽस्याः कारणंकाव्यसंपदः
मनःप्रसत्तिः प्रतिभाप्रातःकालेभियोगिता अनेकशास्त्रदर्शित्वमित्यर्थालोकहेतवः द्वित्रिकोष परिज्ञानंद्वित्रिव्याकर

अ॰शे॰ णज्ञता छन्दोविद्याप्रवीणत्वंकाव्येवश्यमपेक्षते आदिपदात्प्रकारपरिज्ञानम् तथाहिसाखल्वेषाभारतीसुरसरिदिवसहस्रमु
३ ख्यपिसंक्षेपेणचतुर्द्धाप्रवर्तते तदाहुः संस्कृतंप्राकृतंचैवपैशाचीमागधीतथा विद्याश्चतस्रएवैताः संक्षेपात्काव्यवर्त्मनः दे
वाद्याःसंस्कृतंप्राहुःप्राकृतंकिन्नरादयः पैशाचींचपिशाचाद्यामागधींहीनजातयः चतसृष्वपिमूर्द्धन्यंसंस्कृतंमुनयोविदुः गद्यं
पद्यंचमिश्रंचतत्त्रिधैवव्यवस्थितम् गद्यमुत्कलिकाप्रायंपद्यंगंधीतिचद्विधा तत्रापिपद्यंतदपिवृत्तकंवर्णमात्रयोः समंविषम्य
भेदेनतद्दानंत्यायकल्पते दण्डिनस्तु॥तदेतद्वाङ्मयंभूयः संस्कृतंप्राकृतंतथा अपभ्रंशश्चमिश्रंचेत्याहुरार्याश्चतुर्विधम् प्राकृ
तंतज्ज्ञतत्तुल्यदेश्यादिकमनेकधा अपभ्रंशश्चयच्छुद्धंतत्तद्देशेषुभाषितम् संस्कृतंसर्गबंधादि प्राकृतंस्कन्धकादिकम् आसा
रादित्वपभ्रंशोनाटकादितुमिश्रकम् यथामतियथाशक्तियथौचित्यंयथारति कवेःपात्रस्यचैतासांप्रयोगउपपद्यते॥इत्यलंकारशे
खरेउपक्रमरत्नेकाव्यस्वरूपफलकारणमरीचिः॥ शरीरिकल्पस्यकाव्यस्यरूपान्तरमाह॥रीतिरुक्तिस्तथामुद्रावृत्तिःकाव्यस्य
जीवितम् त्रिविधस्यापिदोषास्तुत्याज्याःश्लाघ्याद्वयेगुणाः अलङ्कारस्तुशोभायैरसआत्मापरेमनः रूपइतिशब्दार्थभेदात्त्रितयान्वयि

परेरसदोषाभावानुकूलवर्णादयः तत्रतत्तद्रसोपकारिण्यस्तत्तद्देशसमुद्भवाः पद्येषुरीतयोगौडीवैदर्भीमागधीतथा तदेतत्पल्लवय
न्ति॥श्रीपादाः॥गौडीसमासभूयस्त्वाद्वैदर्भीचतदल्पतः अनयोः सङ्करोपस्तुमागधीसातिविस्तरा गौडीयैः प्रथमामध्यावैदर्भैर्मैथि
लैस्तथा अन्यैस्तुचरमारीतिः स्वभावादेवसेव्यते॥तत्रगौडीयथा॥उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाक
लीकलकलैरुद्गीर्णकर्णज्वराः नीयंतेपथिकैः कथंकथमपिध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमीवासराः॥वैद
र्भीयथा॥मनीषिताः सन्तिगृहेषुदेवतास्तपः क्ववत्सेक्वचतावर्कंवपुः पदंसहेतभ्रमरस्यपेलवंशिरीषपुष्पंन पुनःपतत्रिणः॥मा
गधीयथा॥पाणौपद्मधिया मधूककुसुमभ्रान्त्यापुनर्गण्डयोर्नीलेन्दीवरशङ्कयानयनयोर्बन्धूकबुध्याधरे लीयन्तेकवरीषुबान्धवजन
व्यामोहजातस्पृहादुर्वारामधुपाःकियन्तितरुणिस्थानानिरक्षिष्यसि इयंचबहुधाविस्तृतमन्यत्र॥भोजराजस्तु॥शस्ताविदग्धगोष्ठीषुवै
दर्भीरीतिरुत्तमा मागधीमध्यमागौडी गौडस्त्रीकलहायते॥यदाह॥ब्रह्मन्विज्ञापयामित्वांस्वाधिकारजिहासया॥गौडस्त्यजतुवागा
ध्याममन्यावास्तुसरस्वती॥उक्तिंविभजते॥लोकच्छेकार्भकोन्मतभेदादुक्तिश्चतुर्विधा॥ तत्रलोकोक्ति॥शापान्तोमेभुजगशयनादुत्थि

अ॰शे॰ तेशार्ङ्गपाणौशेषान्मासान्गमयचतुरोलोचनेमीलयित्वा पश्चादावांविरहगुणितं तमात्माभिलाषंनिर्वेक्ष्याव: परिणतशरच्चन्द्रि
४ कासुक्षपासु ॥ छेकोविदग्धस्तस्योक्तिर्यथा ॥ योतिदीर्घासिताक्षस्यविलासचलितभ्रुव: कान्तामुखस्यावशगस्तस्मैनृपशवेनम:
॥ अत्रनृपशवद्विति ॥ अर्भकोक्तिर्यथा ॥ सकिंस्वंगतरु:कोपियस्यपुष्पंनिशाकर: मात:स्तेकीदृशावृक्षायेषांमुक्ताफलंफल
म् अत्रपुष्पंनिशाकर: फलंमुक्ताफलमिति ॥ उन्मत्तोक्तिर्यथा ॥ क्वाकार्यंशशलक्ष्मण: क्वचकुलंभूयोपिदृश्येतसादोषाणांप्रशमाय
न:श्रुतमहोकोपेपिकान्तंमुखम् किंवक्ष्यन्त्यपकल्मषा:कृतधिय: स्वप्नेपिसादुर्लभाचेत: स्वास्थ्यमुपैहिक: खलुयुवाधन्योधरंधास्य
ति अत्रविरहोन्मत्तस्यै वमभिधानं विन्यासविशेषवशाद्यत्राभिप्रायविशेषलाभेनमुदोहर्षस्योत्पत्ति: सामुद्रा ॥ तामिदानींविभजते
मुद्रापदस्यवाक्यस्यविभक्तेर्वचनस्यच ॥ तत्रपदमुद्रायथा ॥ निर्माल्यंनयनश्रिय: कुवलयंवक्त्रस्यदास: शशीभ्रूयुग्मस्यसनाभिम
न्मथधनुर्ज्योत्स्नास्मितस्याचलम् संगीतस्यचमत्तकोकिलरुतान्युच्छिष्टमेणीदृश: सर्वाकारमहोविधे: परिणतंविज्ञानशिल्पंचिरा
त् अत्रनिर्माल्यादिपदानांगौणवृत्त्याऽभिप्रायविशेषान्मुत्प्रदायिता ॥ वाक्यमुद्रायथा ॥ रामेतटान्तवसतौकुशतल्पशायिन्यद्यापिना

मभवतोभगवन्ननास्या स्मृत्वातदेहिसगरंचभगीरथंचदृष्ट्वाथवाममधनुश्चशिलीमुखांश्च अत्रसगरंचभगीरथंचेत्यादिवाक्यस्यप्रा
गुपकाराभिप्रायेणदृष्ट्वायावदुपकारसामर्थ्याभिप्रायेणनिवेशनान्मुत्प्रदायिता॥विभक्तिमुद्रायथा॥श्रियंप्रदुग्धेविपदोरुणद्धियशांसि
सिसूते: विनयंप्रमार्ष्टि संस्कारशौचेनपरंपुनीतेशुद्धाहिवुद्धिः किलकामधेनुः अत्रप्रदुग्धइत्यादितिङ्विभक्तीनांद्वयोर्द्विकर्मयोर्निवेश
नान्मंगल्यामंगल्या र्थकानामपिमंगल्यएवाभिप्रायवशाद्विभक्तिमुद्रा॥वचनमुद्रायथा॥विश्वंभराभगवतीभवतीमसूतरा
जाप्रजापतिसमोजनकः पिताते तेषांवधूस्त्वमसिनन्दिनिपार्थिवानां येषांगृहेषुसविताचगुरुर्वयंच अत्रवयमितिवचनेनसवितु
रहंमहानित्यभिप्रायाद्वचनमुद्रा प्रयोजनेयथैतासांरसमैत्रीचविस्तरः तथालंकारसर्वस्वेसप्रपंचमदर्शयम् इत्यलंकारशेषरउप
क्रमरत्नेरीत्यादिवहिरंगत्रयमरीचिः॥अथवृत्तिंविभजते॥पदानांवृत्तयस्तिस्रः तिस्रोवृत्तयः पदानांभवन्ति शक्तिर्लक्षणाव्यंजनाचे
तितत्रशक्तिरीश्वरेच्छायासंकेतइत्युच्यतेसापदेषुप्रसिद्धैव॥साच॥कोशव्याकरणाप्तोक्तिवाक्यशेषोपमादितः प्रसिद्धपदसंवन्धाद्व्यव
हाराच्चबुध्यते लक्षणाशक्यसम्वन्धः साचतात्पर्यानुपपत्त्यामुख्यार्थानुपपत्त्यावाप्रवर्तते॥यथा॥निर्माल्यंनयनश्रियइत्यादौनिर्माल्यपदा

सादिपदे॥तृतीयावृत्तिर्व्यंजनायथा॥निःशेषच्युतचंदनंस्तनतटंनिर्मृष्टरागोधरोनेत्रेदूरमनञ्जनेपुलकितातन्वीतवेयंतनुः मिथ्यावादिनिदूतिवांधवजनस्याज्ञातपीडागमेवापींस्नातुमितोगतासिनपुनस्तस्याधमस्यान्तिकम् अत्राधमपदेनरंतुंगतासीतिव्यज्यते ननुरविस्तंगतइत्यादौतान्येवपदानिकथंश्रोतॄणांविचित्रवुद्धीरुत्पादयंतीत्यतआह विचित्रसहकारिणाम् तदेवहिपदंस्वरससमभिव्याहारप्रकरणतात्पर्य्यज्ञानादिरूपसहकारिभेदात्तत्तद्धियमुत्पादयति दण्ड इवगवाभ्यजनघटौ ननुशक्यादिकमानुपूर्वीविशेषविशिष्टवर्णसमुदायेतत्कथमेकदेशस्यवोधकता॥अतआह॥स्वभाववैचित्र्यजुषाम् विचित्रस्वभावानिखलुपदानिभवंति क्वचिदेकदेशस्याद्यस्यवोधकता यथाभीमसेनवलदेवादिपदादौ॥क्वचिच्चरमस्ययथा॥मतंगजवसुंधराधराधरपदादौ साचतत्तत्पदस्मरणेनप्रकारान्तरेणचेत्यन्यदेतत् किंचकर्णावतंसपदवत् शक्यतावच्छेदकस्यपृथगुपादानेनापिनपौनरुक्त्यंभवतियथा करिवृंहितमयूरकेकादौक्वचित्॥शक्यस्यापियथा॥उदयाचलकारागृहादौ उंदयपदस्यपूर्वाचलेकारापदस्यवन्दिगृहेशक्यत्वात् किंच परस्परविरुद्धतयातिरस्कृततृतीयकोटिकमिवान्यतरप्रतिक्षेपेपरस्यैवलाभंजनयति॥यथा॥शीतेतरानुस्मकराद्धिमांशोः इत्यादौ अपं

सु लानांधुरिकीर्त्तनीयासनन्दिनीस्तन्यमनिन्दितात्मा इत्यादौ प्रकर्षलाभवदित्यवधेयम् किंचित्पदमनपेक्ष्यरूढिकम्॥यथा॥सिंहाद
वापद्विपदंनृसिंहइत्यादौ किंचिद्यानपेक्ष्ययौगिकम्॥यथा॥क्षीराम्भोधेरित्यादौ अन्यथाऽनन्वयापत्तिः किंचवामनयनावामोरूरिति
भवति नतुवामवदनावामपाणिरिति सर्वं चेदंक्वचिदेकपदे अतउक्तंस्वभावेति तत्किंयत्व्यञ्जनापिपदमात्रवृत्तिरेवनेत्यतआह॥
व्यञ्जनार्थत्रयेपिच शक्यलक्ष्यव्यङ्ग्यात्मकइत्यर्थः॥शक्यार्थस्यव्यञ्जकतायथा॥अवलोकयनिष्पन्दोविशिनीपत्रेबकोभाति निर्म
लमरकतभाजनोपरिस्थितोविमलशंखशुक्तिरिव अत्रनिष्पन्दशब्दस्यार्थेनक्रियाविरहेणवकगतमाश्वस्तत्वंव्यज्यते॥लक्ष्यार्थस्यय
था॥मुखंविकसितस्मितंवशितवक्रिमप्रेक्षितंसमुच्छलितविभ्रमागतिरपास्तसंस्थामतिः उरोमुकुलितस्तनंजघनमंसबंधोद्धुरंवते
न्दुवदनातनौतरुणिमोद्गमोमोदते अत्रविकासः पुष्पधर्मोमुखेनुपपन्नइतिलक्षितेनप्रसृतत्वेनलोकोत्तररमणीयतात्मकातिशयो
व्यज्यते॥एवमग्रेपिव्यंग्यार्थस्ययथा॥अवलोकयइत्यादावेवव्यंग्येनाश्वस्तत्वेनदेशस्यसंकेतयोग्यत्वंव्यज्यते॥त्रिविधस्यापीति॥उत्त
ममध्यमाधमात्मकस्य तत्रवाच्यनिरूपितव्यंग्यप्रकर्षाधारत्वमुत्तमत्वम्॥यथा॥निःशेषच्युतचन्दनमित्यादौ वाच्यापेक्षयाव्यंग्यार्थे

अ॰ श्लो॰ एवभटितिचमत्कारविशेषमारोहति वाच्यनिरूपितव्यंग्यप्रकर्षानाधारत्वंमध्यमत्वम्॥ यथा॥ ग्रामतरुणंतरुण्यानववञ्जुलमंजरी
६ सनाथकरंपश्यन्त्याभवतिमुहुर्नितरांमलिनामुखच्छाया अत्रवञ्जुलकुञ्जेदत्तसंकेतातरुणीनगतेतिव्यज्यते तच्चगुणीभूतंतदपेक्षया
वाच्यस्यैवचमत्कारित्वात् चमत्कृतिहेतुव्यंग्यरहितत्वमधमत्वम्॥ यथा॥ वन्दामहेमहेशानचण्डकोदण्डखण्डनम् जानकीहृदयानं
दचन्दनंरघुनंदनम् अत्रव्यंग्यः कोप्यर्थस्तादृशोनास्ति अत्रसर्वत्रवक्तुरेवतात्पर्य्यनियामकम् तज्ज्ञानमेववोधोपयोगितदभावादधम
मित्युच्यते प्रपञ्चितंचेदंमयैववाक्यरत्ने ननुव्यंजनावृत्त्यंतरमित्यत्रकिंमानमिति॥ उच्यते॥ भद्रात्मनोदुरधिरोहतनोर्विशालवंशोन्नतेः
कृतशिलीमुखसंग्रहस्य यस्यानुपप्लुतगतेः परवारणस्यदानांवुसेकसुभगः सततंकरोभूत् अत्रप्रकरणेनभद्रात्मनइत्यादिपदानांराजित
दन्वययोग्येचार्थेऽभिधानियन्त्रणेपिगजस्यतदन्वययोग्यस्यचार्थस्यव्यञ्जनयैवप्रतीतिः वस्तुतस्तुभद्यारभ्यचिरंसाधोनिःशंकमिहसंच
र रेवाकुंजेमृगेंद्रेणसदुष्टश्वाद्यघातितः अत्रभिक्षुकंप्रत्येवंवदंत्याः प्रतिवेशिनंप्रतिनिःशंकरत्यभिधानेस्फुटंइति किंचरेवाकुंजस्यरतस्या
नत्वंलभ्यते सिंहवुद्ध्यापरेणनगन्तव्यम् सिंहस्तुवस्तुगत्यानास्त्येव तदेतद्व्यञ्जनांविनाप्रकारांतरेणलब्धव्यमित्याशंकैवनास्तीति॥ इत्य

लेकारशेखरेउपक्रमरत्नेश्तिमरीचिः॥दोषःसर्वात्मनात्याज्योरसहानिकरोहिसः अन्योगुणोस्तुवामास्तुमहान्निर्दोषतागुणः॥दण्डीचा॥त
दल्पमपिनोपेक्ष्यंकाव्येदुष्टंकथंचन स्याद्वपुस्सुन्दरमपिश्वित्रेणैकेनदुर्भगम् दोषत्वंचरसोत्पत्तिप्रतिबन्धकत्वम् रसकारणीभूताभाव
प्रतियोगियथार्थज्ञानविषयत्वमितियावत्॥अत्रप्रथमंपददोषानाह॥कष्टाप्रयुक्तसंदिग्धव्यर्थाश्लीलाप्रतीतकाः असाध्ववाचकौदोषाः
पदेष्टावेवभाषिताः॥कष्टंश्रुतिकटुयथा॥वर्हिनिर्ह्रादनार्हेस्मिन्कालेजीमूतमालिनि आलिङ्गितस्सतन्वङ्ग्याकार्तार्थ्यंलभतांचिरात् अत्रव
र्हिनिर्ह्रादकार्तार्थ्यादिशब्दाः॥अप्रयुक्तम्॥तथाम्नातमपिकविभिर्नाहृतम्॥यथा॥यतोऽयंदारुणाचारोनहन्तिसुरनिम्नगाम् अतोमन्ये
दैवतोस्यपिशाचोराक्षसोऽथवा अत्रहंतीतिगमनेदैवतशब्दःपुंसिकविभिर्नप्रयुक्तः॥संदिग्धम्॥सन्देहजनकम्॥यथा॥अपिधानेनहेवक्त्र
किमर्थमिहवर्तसे आरादेवास्तिसप्रायोपतस्तेभयमुत्थितम्॥अत्रापिधानाराच्छब्दौ॥व्यर्थम्॥प्रकृतार्थानुपयुक्तम्॥यथा॥विभर्ति
यश्चदेहार्द्धेप्रियामिन्दुंहिमूर्द्धनि सर्वेदेवः खलुत्वान्तुपुनातुमदनान्तकः अत्रचहिवैखलुतुशब्दाः अश्लीलमौज्ज्वल्याभाववत् तदपि
त्रिविधम् अमंगलव्रीडाजुगुप्साभेदात्॥क्रमेणोदाहरणम्॥विनाशान्मारुतेस्तस्यसुमरुत्साधानोपिसन् नासाग्रेणससुग्रीवोवायुंत्यज

अ॰शे॰ सिकेवलम् अत्रविनाशसाधनवायुशब्दाः ॥ अप्रतीतम् ॥ स्वशास्त्रमात्रप्रसिद्धम् ॥ यथा ॥ त्रुटौविश्रान्तिरित्येकेपीलावस्तीतिचापरे
७ त्वन्मध्यमाणिमातन्विनकेनापिविभाव्यते ॥ अत्रत्रुटिपीलुशब्दौ ॥ असाधुअनुशासनविरुद्धम् ॥ यथा ॥ शातोदरिकथंकारंमानमेत
च्चिकीर्षसि मानिनीमानदलनोविजयत्येषचन्द्रमाः ॥ अत्रमानमेतद्विजयतीतिअवाचकम् ॥ प्रकृतार्थाशक्तम् ॥ यथा ॥ भूयोमन्त
द्विरदगमनांहारकेयूरयुक्तांपीनोत्तुङ्गस्तनभरनमन्मध्यभागाभिरामाम् स्मेरोदंचन्नवकिसलयस्पर्द्धिताम्राधरोष्ठींलक्ष्मीमक्षिस्फु
रितवदनामन्वहंसंस्मरामि अत्रलक्ष्मीपदमङ्गनायाःग्राम्यत्ववाचकाश्लीलान्यतरान्तर्भावान्नपृथगिति ॥ इत्यलंकारशेखरेदोष
रत्नेपददोषमरीचिः ॥ अथेदानींसाधारणान्वाक्यदोषानाह न्यूनंविसंधिव्याकीर्णसमाप्तपुनरात्तकम् भग्नक्रमयतिछन्दोवाक्य
गर्भमरीतिमत् अविमृष्टविधेयांशंसमुदायार्थवर्जितम् विरुद्धमतिकृद्वाक्येदोषाद्वादशकीर्तिताः तत्रन्यूनमन्वयबोधप्रयोज
कपदशून्यम् ॥ यथा ॥ तथाभूतांदृष्ट्वानृपसदसिपांचालतनयांवनेव्याधैस्सार्द्धंसुचिरमुषितंवल्कलधरैः विरादस्यावासेस्थितम
नुचितारंभनिभृतंगुरुःखेदंखिन्नेभजतिमयिनाद्यापिकुरुषु अत्रस्थितमित्यनंतरमस्माभिरिति खिन्नइत्यस्मात्पूर्वमित्यमिति

यदातुमर्हति॥विसंधिः सन्धिविरहो विरुद्धसंधिश्च॥आद्योपि द्विविधः॥ऐच्छिकः प्रगृह्यादिनिबन्धनश्च ऐच्छिकस्सकृदपि दोषः मेघानि
लेनअमुनाएतस्मिन्नद्रिकाननेपादपाउत्तमाउश्चाद्दुदानीमेवपातिताः॥ चरमश्चतुर्विधः॥अश्लीलंकष्टउत्वप्राप्तविसर्गोलुप्तविसर्गश्च॥क्र
मेणोदाहरणानि॥वपुरिन्दीवरश्रेणिबान्धवायत्रवायवः मञ्जर्युद्गमगर्भासौतर्वाल्पुर्वीविधूयते धीरोविनीतोनिपुणोवराकारोनृपोत्रसः
यस्यभृत्याबलोत्सिक्ताभक्ताबुद्धिप्रभाविताः व्याकीर्णव्यवहितान्वयम्॥यथा॥मसृणचरणपातंगम्यतांभूः सदर्भा विरचयसिचयांतंमू
र्द्ध्निघर्म्मःकठोरः तदितिजनकपुत्रीलोचनैरश्रुपूर्णैः पथिपथिकवधूभिर्वीक्षिताशिक्षिताच॥अत्रतद्गम्यताम्॥तद्विरचयेत्यन्वये तदिति
व्यवहितम्॥समाप्तपुनरात्तकम्॥समाप्तौप्रधानवाक्यार्थबोधेजातेपुनरुपात्तम्॥यथा॥निर्माल्यंनयनश्रियद्दत्यादौचिरादिति॥यथाच॥
क्रेङ्कारःस्मरकार्मुकस्यसुरतक्रीडापिकीनांरवोझङ्कारोरतिमञ्जरीमधुलिहांलीलाचकोरध्वनिः तन्व्याकञ्चुलिकापसारणभुजाक्षेपस्ख
लत्कङ्कणक्काणःप्रेमतनोतुवोनववयोलास्यायवेणुस्वनः अत्रवेणुस्वनइति॥भग्नक्रमंयत्रार्थः शब्दोवाक्रमेणनास्ति॥उभयंयथा॥तुरङ्ग
मथमातङ्गःप्रयच्छास्मैमदालसम् कान्तिप्रतापौभवतःसूर्याचन्द्रमसोःसमौ॥भग्नयतिर्यथा॥ रामेतउन्तवसतौकुशतल्पशायिन्यद्या

अ॰शे॰ पित्यादौ अत्रावश्यकोपदशेषयतिर्नास्ति॥भग्न छंदो यथा॥ततः परमोमित्युक्त्वा प्रतस्थेमुनिमण्डलम् भगवानपि संप्राप्तः प्रथमोद्दिष्टमाश्र
८ मम् अत्रचतुर्थेगौरवेपञ्चमंलघुकर्तुमर्हति यत्राःपर्यवसितवाक्यमध्येतदनपेक्षवाक्यान्तरमनुप्रविशतितद्वाक्यगर्भम्॥यथा॥योऽयो
मल्लेपुत्रः सोयंदशवदनलक्ष्मणेनमया रक्षैनंयदिशक्तिर्मृत्युवशंनीयते विवशः॥अत्रतृतीयपादगर्भता॥अरीतिमत्॥यांरीतिमुपक्रम्य
प्रवृत्ततद्भङ्गवत्॥यथा॥गाहन्तांमहिषानिपानसलिलंश्रृङ्गैर्मुहुस्ताडितंछायाबद्धकदम्बकंमृगकुलंरोमन्थमभ्यस्यतु विस्रब्धैः क्रियतां
वराहपतिभिर्मुस्ताक्षतिः पल्वलेविश्रामंलभतामिदंचशिथिलज्यावद्धमस्मद्धनुः अत्रतृतीयपादेनभिहितकर्त्रोदरान्तद्भङ्गः॥अवि
मृष्टविधेयांशम्॥प्राधान्यानिर्दिष्टविधेयकम्॥यथा॥वपुर्विरूपाक्षमलक्ष्यजन्मतादिगम्बरत्वेननिवेदितंवसु वरेषुयद्बालमृगाक्षिमृ
ग्यतेतदस्तिकिंव्यस्तमपित्रिलोचने अत्रजन्मोद्दिश्यालक्ष्यकम्विधेयम् तच्चसमासप्रविष्टतयानप्राधान्येननिर्दिष्टम्॥समुदायार्थवर्जि
तंयथा॥जरद्गवः कम्बलपादुकाभ्यांद्वारिस्थितोगायतिमंगलानि तंब्राह्मणीपृच्छतिपुत्रकामाराजन्नुमायांलशुनस्यकोर्घः अथविरुद्ध
मतिकृतकुबेरस्येवभगवान्भवानीरमणोहरः अकार्यमित्रमेकोसौवासुदेवः किरीटिनः अत्रभवानीरमणाकार्यमित्रशब्दौविरुद्धांमतिं

कुरुतः अत्रासमर्थसमासो दोषान्तरं गोवर्धनः॥ यथा॥ प्राक्प्रत्यक्पृथिवीभृतोः परिषदि प्रख्यातसंख्यावतामल्लापाद्भुततर्ककर्कशतया वि
च्छिद्य विद्यामदम् ये केऽप्युत्कलभूपतेस्तव सभासंभाविताः पण्डिताः पत्रं श्रीजयदेवपंडितकविस्तन्मूर्द्धि विन्यस्यति॥ इत्यलंकारशेखरे वा
ग्दोषमरीचिः अथार्थदोषानाह॥ अष्टार्थदोषा विरसग्राम्यव्याहतखिन्नताः हीनाधिकासदृक्साम्यं देशादीनां विरोधि च अत्र विरसं प्रस्तुत
रसविरुद्धम्॥ यथा॥ किं रोदिषि हाराद्यैः सुतमरणशुचं जहीहि किं म्रियसे सफलय यौवनमधुना समनुरक्तेन सुतनु मया अत्र करुण
शृङ्गारयोर्महान्विरोधः ग्राम्यमविदग्धोक्तिनिष्पन्नम्॥ यथा॥ स्वपिम्यद्यानवद्याङ्गि संप्रत्याप्तस्तवान्तिके मनागूरुद्वयं बाले कुञ्चितं समु
दञ्चय॥ व्याहतं॥ उपात्तविरुद्धम्॥ यथा॥ विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः साचीकृता चारुतरेण तस्थौ मुखे
न पर्यस्तविलोचनेन अत्र शैलदुहितृत्वभावप्रकाशनत्वे विरुद्धे एकेन प्रस्तरप्रकृतित्वस्यापरेण विदग्धत्वलाभात्॥ खिन्नमपुष्टम्
त्वत्प्रयाणसमुद्भूतधूलीलुम्पतिभास्करम् कृपाणं पाणिना धत्से शूरेण त्वत्समो भुवि अत्र धूल्युत्थापनकृपाणधारणयोः शूरसाधारण्या
त्॥ शौर्यस्यापुष्टिः॥ हीनोपमं यथा॥ क्वचिदग्रे प्रसरता क्वचिदापत्य निघ्नता शुनेव सारंगकुलं त्वया भिन्नं द्विषां बलम्॥ अधिकोपमं यथा॥

वसिष्ठवद्यंदासोहनूमानिवमूषिका सरस्वानिवकूपोयंमुनीयंश्रीरिवस्वयम् अत्रयद्यप्युपमेयानांप्रकर्षएव तथाप्यात्यन्तिकरसहा
नेःसोपिनप्रतीयते॥असदृशोपमंयथा॥निर्ययौरुद्रनयनात्सस्फुलिङ्गोमहानलः वर्षन्तीशीकरासारंगंगाहिमगिरेरिव अत्रस्फुट
मसादृश्यम्॥देशादिविरोधियथा॥तत्रदेशकालवयोवस्थादिविरोधः प्रतीयते॥यथा॥प्रवेशेचैत्रस्यस्फुटकुटजराजिस्मितदिशिप्र
चण्डेमार्त्तण्डेहिमकरसमानोष्ममहसि जलक्रीडायातंमरुसरसिवालद्विपकुलंमदेनान्धंविध्यत्यः समपारपातैःप्रशमिनः अत्रप्रवे
शेचैत्रस्यस्फुटकुटजेतिकालस्य मरुसरसीतिदेशस्यमदेनान्धमितिवयसः प्रशमिनइत्यवस्थायाः इदंचतत्तच्छास्त्रतत्तत्प्रमाणतत्त
ल्लोकादिभेदादनन्तम्॥तत्रतु॥लोकस्यकवेश्चप्रसिद्धोविरोधः तत्रकविप्रसिद्धिरेववलीयसीति॥यथा॥सुसितवसनालंकारायां
कदाचनकौमुदीमहसिसुदृशिस्वैरंयात्यांगतोस्तमभूद्विधुः तदनुभवतःकीर्तिःकेनाप्यगीयतयेनसाप्रियगृहमगान्मुक्ताशंकाक्व
नासिशुभप्रदः अत्रकीर्त्तेर्ज्योत्स्नावत्प्रकाशतालोकविरुद्धापिकविसमयसिद्धेत्यदोषःननुकथममीषांदोषता आकांक्षादिज्ञानाभ
वेशाब्दज्ञानाविलम्बादितिचेन्न वाक्यान्तरापेक्ष्याकांक्षेसामग्रीवैलक्षण्यात् अन्यथाप्रतीतिवैलक्षण्यानुपपत्तेः तथाचान्वयवो

3770

धानुकूलार्थाक्षरसत्वेपि रसोत्पत्त्यनुकूलार्थाद्यविरहो दोष इति ध्येयम् संप्रदायानुरोधेनव्याख्येयं ममवस्तुतः तादृक्काव्यंप्रकुर्वी
तयत्नोहेगोनधीमताम्॥ इत्यलंकारशेखरेवाक्यार्थदोषमरीचिः श्लाघ्यागुणाइत्युक्तंयुक्तंचैतत्॥ यदाह॥ अलंकृतमपिश्राव्यंनकाव्यं
गुणवर्जितम् गुणयोगस्ततोमुख्योगुणालङ्कारयोगयोः॥ उक्तंचश्रीपादेन॥ शब्दार्थौकाव्यस्यशरीरम् आत्मारसोगुणाः शौर्यादिवत् दो
षाः काणत्वादिवत् अलङ्काराः कुण्डलादिवत्॥ तान्विभजते॥ गुणः सामान्यतोद्वेधाशब्देष्वर्थेषुचस्थितः दोषाणामप्यदोषत्वंप्राहु
र्वैशेषिकान्गुणान् तत्रसंक्षिप्तत्वमुदात्तत्वंप्रसादोक्तिसमाधयः अन्नैवान्यसमावेशात्पंचशब्दगुणास्मृताः॥ स्वल्पाक्षरेणभूयोर्थ
कथनंसंक्षेपः॥ यथा॥ तेहिमाचलमामन्त्र्यपुनः प्रेक्ष्यचशूलिनम् सिद्धंचास्मैनिवेद्यार्थंतद्विसृष्टाः खमुद्ययुः श्लाघ्यविशेषण
वत्वमुदात्तत्वम्॥ यथा॥ श्रुत्वायंसहसागतंनिजपुरात्त्रासेननिर्गच्छतांशत्रूणामवरोधनैर्जलभरप्रस्यन्दलिम्पत्पुटाः शुभ्रेस
त्यनिपल्लविन्युपवनेकाप्यानवाभोरुहिक्रीडाद्रौनवशाद्वलेविचलितग्रीवैर्विमुक्तादृशः अत्रशुभ्रेपल्लविनीत्यादिविशेषणानांश्ला
घ्यता झटित्यर्थप्रत्यायकत्वंप्रसादत्वम्॥ यथा॥ सविश्वजितमारेभेयज्ञंसर्वस्वदक्षिणम् आदानेहिविसर्गायसतांवारिमुचामिव

अ०३ कौशलादर्थविशेषलाभउक्तिः॥यथा॥कुशलंतस्याजीवतिकुशलंपृच्छामिजीवतीत्युक्तम् पुनरपितदेवकथयसिमृतांनकथ्यया

१० मिपाश्वसिति अत्रकुशलमकुशलंवेत्युत्तरेकर्तव्येजीवतीत्युक्तिविशेषाज्जीवितमात्रंलभ्यते॥अन्यधर्माणामन्यत्रारोपणंस

माधिः॥यथा॥नीलाब्जानांनयनयुगलद्राघिमादत्तपत्रः कुंभावेभौकुचपरिकरः पूर्वपक्षीचकार भ्रूविभ्रांतिर्मदनधनुषोविभ्र

मानन्वयादीत् वक्त्रज्योत्स्नासितकररुचंदूषयामासतस्याः अत्रपत्रदानादिपदानांचेतनधर्माणामारोपणमिति॥इतिशब्दगुण

मरीचिः ॥ अथार्थगुणानाह॥भाविकत्वंसुशब्दत्वंपर्यायोक्तिः सुधर्मिता चत्वारोर्थगुणाः प्रोक्ताः परेत्वत्रैवसंगताः संगताअं

तर्भूताः॥तदाहुः॥अलंकाराश्रिताः केचिद्दोषान्तर्गताः परे चतुर्ष्वन्तर्गताः केचिदतश्चत्वारएवते॥तत्रभाविकत्वमभिप्राय

पूर्वकाभिधानम् स्वयंदेत्यमितियावत्॥यथा॥दृष्टिंहेप्रतिवेशिनिक्षणमिहाप्यस्मद्गृहेदास्यसिप्रायेणास्यशिशोःपितानवि

रसाः कौपीरपः पास्यति एकाकिन्यपियामितद्वरमितः स्रोतस्तमालाकुलंनीरंध्रास्तनुमालिखन्तुजरठच्छेदानलग्रंथयः अत्रो

पपत्तिप्रतिसंकेताभिप्रायेणैवमभिधानम्॥दारुणेर्थेः दारुणपदतासुशब्दता॥यथा॥देवव्रतेवांछतिदीर्घनिद्रांद्रोणेचकर्णे

वपशोवशेषे लक्ष्मीसहायस्तवाद्यक्लवात्सल्यवान्द्रोणिरयंसहायः अत्र॥ मुमूर्षतिमृतेचेत्यर्थेईदृक्पदत्ताक्रमेणपद्दूत्सुततत्क्र
माभिधानम्॥पर्यायोक्ति यथा॥प्रथममरुणच्छायस्तावत्ततः कनकप्रभस्तदनुविरहोत्ताम्यत्तन्वीकपोलतलद्युतिः उदय
तिलतोध्वांतध्वंसक्षमः क्षणदामुखेसरसविसिनीकन्दच्छेदच्छविर्मृगलांछनः यत्रविशेषणद्वाराविशेष्यलाभः सासुधर्मिता॥
यथा॥अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनालीवालमन्दारपुष्पम् विरहविधुरचक्रद्वन्द्ववन्धुर्विभिन्दन्कुपि
तककपिकपोलक्रोडताम्रस्तमांसि अत्रपद्मिनीप्रकाशादीनांसूर्य्यनियतत्वात्तल्लाभः॥ इत्यर्थगुणमरीचिः॥८॥ इदानींवैशेषि
कान्गुणानाह॥ पदवाक्यतदर्थेषुयेदोषाः पूर्वमीरिताः तेषांक्वचिददोषत्वंयत्तद्वैशेषिकोगुणः उक्तानामेवदोषाणांविषयाव
स्थादिभेदाद्यददोषत्वंतदेववैशेषिकगुणत्वमित्यर्थः॥केचित्तु॥अेतेषामेवदोषाणांस्थानेष्वेतेषुदोषतापरंनत्वस्तिगुणतापार्थ
क्यमनयोर्यतः अन्येतु क्वचिददोषतामात्रेक्वचिद्गुणतापितत्रसहृदयानामेवप्रतीतिः साक्षिणी॥ तदाहुः॥ अलङ्कारेगुणेदोषेरसे
चकाव्यसम्पदाम् प्रतीतिरेवविदुषांप्रमाणमवसीयते॥ श्रीपादस्तु॥ रसोत्पत्तिप्रतिवन्धकतयैवैतेषांदोषता यत्रकेनापिनिमि

 तेननरसप्रतिबन्धस्तत्रादोषत्वमुचितमेवेत्याह तत्रपदेषुयथासम्भवमाह अनुप्रासेषुनोकष्टम्॥यथा॥महाराष्ट्रेतुनोष्ट्रिणः इत्यादौ श्ले
 षादीनाप्रयुक्तता येनध्वस्तमनोभवेनबलिजित्कायः पुरास्त्रीकृतोयोगङ्गांचदधेऽन्धकक्षयकरोयोबर्हिपत्रप्रियः यस्याहुः शशिमच्छि
रोहर इतिस्तुत्यंचनामामराः सोऽव्यादिष्ट भुजङ्ग-हारवलयस्त्वांसर्वदोमाधवः अत्रक्षयशब्दोगृहे मिथस्तुतौनसन्दिग्धम्॥यथा॥पृथु
कार्त्तस्वरपात्रंभू षितनिःशेषपरिजनंदेव विलसत्करेणुगहनंसंप्रतिसममावयोस्सदनम् नत्वर्थयमकादिषुयथा दधत्युरोजद्वयमुर्व
शीतलंभुवोगतेवस्त्वयमुर्वशीतलम् बभौमुखेनाप्रतिमेनकाचनश्रियाधिकायोप्रतिमेनकाचन॥अत्रचमत्कारः नाश्लीलंभगवत्यादिषु
॥तदाहुः॥भगिनीभगवत्यादौशिवलिङ्ग-गुहादिषु अभिप्रेतकुमार्यादौत्वश्लीलंनैवदुष्यति अश्लीलत्रयमत्रोक्तमितिध्येयम्॥दण्डीतु॥नि
ष्ठ्यूतो द्गीर्णवान्त्यादिगौणवृत्तिव्यपाश्रयम् अतिसुन्दरमन्यत्रग्राम्यकक्षांविगाहते॥तद्विदेनाप्रतीतकम् यथा सर्वकार्यशरीरेषुमुक्त्वा
गस्कन्धपंचकम् सौगतानामिवात्मान्योनास्तिमन्त्रोमहीभृताम् सहायाः साधनोपायादेशकालौबलाबलौ विपत्तेश्चप्रतीकारः पञ्चा
ङ्गमन्त्रउच्यते रूपंसंज्ञाच संस्कारोवेदनानुभवस्तथा इतिबौद्धाः शरीरेषुमन्यन्तेस्कन्धपंचकम्॥इतिभार्गवसर्वस्वे॥नासाध्वनुकृतौ

हुंहुंहुंननममेतियुवत्याजल्पितंजयतिमानधनायाः इत्यादौ नापिलक्षणादाववाचकम् ॥ ७ ॥ ७ ॥ लक्षणादेरशक्येप्रवृत्ति
त्वादितिहृदयम् ॥ इदानींवाक्येषुयथासम्भवमाह ॥ प्रतीत्यबाधान्नन्यूनम् ॥ यथा ॥ तस्यसंवृतमन्त्रस्यगूढाकारेङ्गितस्यच फलानुमेयाः
प्रारंभाःसंस्काराः प्राक्तनाइव यत्रान्यत्क्रियापदंनास्तितत्रास्तिर्भवतिर्वाप्रथमपुरुषेप्रयुज्यते इतिन्यायेनयत्रतद्वयेननापत्तिस्तत्रतद्दूष
णमित्यर्थः सर्वंप्रकरणादिनापदान्तरस्यलाभेद्रष्टव्यम् ॥ अतउक्तम् ॥ प्रतीत्यबाधोदिति पादभेदेविसंधिर्न ॥ यथा ॥ यद्यपिनदृतिस
रोषंमृगपतिपुरतोपिमत्तगोमायुः तदपिनकुप्यतिसिंहोअसदृशपुरुषेषुकःकोपः इन्द्रस्याशुचिसूकरस्यचसुखेदुःखेननास्त्यन्तरं
स्वेच्छाकल्पितयातयोःखलुसुधाविष्ठाचकाम्याशनम् रंभाचाशुचिशूकरीचपरमप्रेमास्पदंमृत्युतः संत्रासोअसमःस्वकर्मगतिभि
श्चान्योन्यभावःसमः ॥ इतिशान्तोदाहरणम् ॥ इहयद्यपिपदलिखितसंधिविरहोनदोषइतितथाप्यनुशासनविरुद्धत्वाद्विसदृशपुरुषे
ष्वितिपठनीयम् नव्याकीर्णन्तुसापेक्षे अथप्रजानामधिपःप्रभातेजायाप्रतिग्राहितगन्धमाल्याम् वनायपीतप्रतिबद्धवत्सांयशोधनोधेनु
मृषेर्मुमोच ॥ इत्यादौ ॥ नान्यवाक्येसमाप्ततासमाप्तपुनरात्तकंवाक्यभेदेनदोषः तंश्रेः प्रतिजग्राहकालिंगोगजसाधनः पक्षच्छेदोद्यतं

अ॰शे॰ शर्क्कशिलावर्षीव पर्वतः॥ यथावा॥ नकिलानुपयुक्तस्यराजानोरक्षितुर्यशः व्याक्त्तायस्परस्वेभ्यः श्रुतीतस्करतास्थिता समस्तेयतिभङ्गेन
१२ यथा कल्याणानांत्वमसिमहसांभाजनंविश्वमूर्त्तेधूर्यालक्ष्मीमलमपिभृशंधेहिदेवप्रसीद यद्यत्पापंप्रतिजहिजगन्नाथनम्रस्यतन्मेभद्रंभ
द्रंवितरभगवन्भूयसेमङ्गलाय विरुद्धंनतथावाक्येविरुद्धंधियमुत्पादयत्विस्यभिप्रायेणप्रयोगेतन्नदोषइत्यर्थः वालादेनार्थवर्जितम् आदि
पदेनवीरवातुलादिपरिग्रहः कांकार्यमित्यादिवाक्यार्थंयथासम्भवमाह विरसंनाप्रधानके॥ यथा॥ क्षिप्तोहस्तावलग्नः प्रसभमभिहतोप्या
ददानोंशुकान्तंगृह्णन्केशेष्वपास्तः चरणनिपतितोनेक्षितस्संभ्रमेण आलिङ्गन्योवधूतस्त्रिपुरयुवतिभिस्साश्रुनेत्रोत्पलाभिः कामीवार्द्रापरा
धः सदहतुदुरितंशांभवोवः शराग्निः अर्थनकर्मणिग्राम्ये अर्थैः पदैः पिशुनयेच्चरहस्यवस्त्वितिभारतोक्तेः॥ सर्वत्रहेतुमाह॥ रसहानेरयोगतः
॥ अथसर्वसाधारणमदोषत्वमाह॥ तत्रतत्राभिधातव्येतथानुकरणादिषु उन्मत्ताद्यभिधानेषुकोपिदोषोनविद्यते॥ श्रीपादस्तु॥ तदर्थातिशये
शेषेदैन्येकोपेवधारणे विषादेविस्मयेहर्षेपुनरुक्तंनदुष्यति॥ इतिवैशेषिकंगुणमरीचिः॥ ९॥ अलंकारास्तुशोभायैइत्युक्तंतच्चसाधु गुणवत्य
पिनिर्दोषेः लंकारैःकाव्यराजनि जायतेन्येवसुषमारत्नालङ्करणैरिव॥ आहुश्च॥ निर्दोषंगुणवत्काव्यमित्यादितत्रचमत्कारविशेषकारित्वमिति

सामान्यलक्षणम् शब्दार्थनिष्ठत्वेनविशेषितंविशेषलक्षणद्वयम् परम्परयारसोपकारित्वंतदित्यन्ये तत्रप्रथमंशब्दालंकारान्विभजते चि
त्रं वक्रोक्त्यनुप्रासगूढश्लेषप्रहेलिकाः प्रश्नोत्तरंचयमकमष्टालंकृतयोध्वनौ तत्रकौतुकविशेषकारिचित्रम् तच्चखड्गचक्रपद्मादिभे
दादनन्तम्॥ यदाह॥ सर्वतोभद्रधेन्वादिगोमुत्रीमुरजादिच गतप्रत्यागताद्यांहुश्चित्रकाव्यंमुनीश्वराः तच्चमाघादौसुव्यक्तत्वान्नेहोदाह्रियते अ
न्याभिप्रायेणोक्तंवाक्यमन्येनान्यार्थकतया यद्योज्यतेसावक्रोक्तिः एतदेववाकोवाक्यमुच्यते॥ यथा॥ कोयंद्वारिहरिः प्रयाह्युपवनंशाखामृगे
णात्रकिं कृष्णोहंदयितेबिभेमिसुतरांकृष्णादहंवानरात् मुग्धेहंमधुसूदनोव्रजलतांतामेवपुष्पान्वितामित्थंनिर्वचनीकृतोदयितयामुग्धोहरिः
पातुवः॥ वर्णसाम्यमनुप्रासः॥ सचद्विविधोलाटानुप्रासश्छेकानुप्रासश्च तत्रासकृदावृत्तवर्णोलाटानुप्रासः॥ यथा॥ अनङ्गमङ्गलगृहापाङ्गभ
ङ्गितरङ्गितैः आलिङ्गितस्सतन्वङ्ग्याकृतार्थयतुमानसम् अनेकस्यव्यंजनस्यसकृत्साम्यंछेकानुप्रासः नितम्बगुर्वीगुरुणाप्रयुक्तावधूर्वि
धातृप्रतिमेनतेन चकारसामत्तचकोरनेत्रालज्जावतीलाजविमोक्षमग्नौ पदमेकंद्विरावृत्तत्वात्तदनुप्रासकाम्यया आदिक्षान्तलिपौका
दिक्षान्तशब्दविच्छित्तयेदितिरहस्यम्॥ गूढंक्रियागुप्तादिः यथा॥ पुंस्कोकिलकुलस्यैतैर्नितान्तमधुरारवैः सहकारद्रुमारम्यावसन्तेकामपि

श्रियम्॥ इदं चनानायदाहुः॥ क्रियाकारकसम्बन्धगुप्तान्यामन्त्रितस्यचगुप्तं तथासमासस्यलिङ्गस्यवचनस्यच एकोच्चारणापह्नुतभेदत्वं श्ले
षत्वम् येनध्वस्तमनोभवेत्यादौ॥ अयंचाष्टधायदाह॥ विभक्तिपदवर्णानां लिंगस्यवचनस्यच भाषाप्रकृत्योर्भेदेनश्लेषास्युः प्रत्ययस्यच
प्रहेलिकासकृत्प्रश्नः साच्युतासरादत्तासरादिः यथा॥ विदग्धः सरलोरागी नितम्बोपरिसंस्थितः तन्वङ्ग्यालिंगितः कण्ठेकलंकूजति
कोविटः अत्रविटइत्यत्रविकारस्थानेपकारादानेद्वितीयोर्थोभवति॥ साचषोढातदाह॥ च्युतासरा। दत्तासरोभयमुष्टिर्विंदुमत्यर्थवत्यपि
प्रश्नोत्तरमपिद्विविधम् वहिरन्तरश्चतत्रवहिः प्रश्नोत्तरम्॥ यथा॥ प्रायः कार्येनियुज्यन्तेजनास्सर्वेत्रकीदृशाः नाधेत्ययंभवेच्छब्दोनौवा
नीवर्दकीदृशाः॥ सावधानाः अन्तः प्रश्नोत्तरं यथा॥ काहमस्मिगुहावक्तिप्रश्नेमुष्मिन्किमुत्तरम् कथमुक्तंनजानासिकदर्थयसियत्सखे
अतुल्यार्थत्वेसत्यानुपूर्वीविशेषविशिष्टनियतव्यञ्जनसमुदायाभ्यासोयमकम्॥ यथा॥ नवपलाशपलाशवनंपुरः स्फुटपरागपराग
तपंकजम् मृदुलतान्तलतान्तमलोकयत्ससुरभिंसुरभिंसुमनोभरैः तत्रेदंसंक्षेपेणसप्तशीतिप्रकारमितिचान्यत्रविस्तरः॥ एतस्मिन्न
मितिगोवर्द्धनः इत्यलंकारशेखरे शब्दालङ्कारमरीचिः॥१०॥ अथार्थालङ्कारान्विभजते॥ उपमारूपकोत्प्रेक्षासमासोक्तिरपह्नुतिः समाहितंस्व

भावस्त्वविशेषः सारदीपकौ सहोक्तिरन्यदेशत्वं विशेषोक्तिविभावने एवंस्युरर्थालङ्काराश्चतुर्दशनचापरे॥ तत्रभेदेसतिसाधर्म्यमुपमा॥ अधि
कगुणवत्तयासंभाव्यमानमुपमानम् निकृष्टगुणवत्तयासम्भाव्यमानमुपमेयम्॥ तांविभजते॥ वाक्यार्थातिशयश्लेषनिन्दाभूतविपर्ययैः सं
शयेनियमः स्वैषविक्रियेत्युपमादश तत्रवाक्यार्थेनैववाक्यार्थोयत्रोपमीयतेसावाक्यार्थोपमा साचद्वयीप्रत्येकसादृश्यानपेक्षा॥ तत्सापे
क्षाच॥ आद्या यथा॥ कामिनीनयनकज्जलपङ्कादुत्थितोमदनमत्तवराहः कामिमानसवनान्तरचारी कन्दमुत्खनतिमानलतायाः॥ अन्त्या
यथा॥ त्वदाननमधीराक्षमाविर्दशनदीधिति भ्रमद्भृङ्गमिवालक्ष्यकेशरंभातिपङ्कजम् यत्रातिशयधर्मोपन्यासस्सातिशयोपमा॥ यथा॥ क
ल्पद्रुमोनजानातिनददातिबृहस्पतिः अयंचजगतीजानिर्जानातिचददातिच यदश्लेषनिबन्धनसाम्यंश्लेषोपमा॥ यथा॥ तमालपत्राभ
रणाराजतेविलसद्रुचाः बालेवोद्यानमालेयंसालकाननशोभिनी यत्रोपमानस्यनिन्दयाप्रतिक्षेपस्सानिन्दोपमा॥ यथा॥ नागेन्द्रहस्तास्त्वचि
कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः लब्ध्वापिलोकेपरिणाहिरूपंजातास्तदुर्वोरुपमानबाह्याः यत्रार्थसंसर्गज्ञानेनसंसर्गमारोप्यसाम्यप्रस
ञ्जनंसाभूतोपमा॥ यथा॥ उभौयदिव्योम्निपृथक्प्रवाहावाकाशगङ्गापयसः पतेताम् तदोपमीयेततमालनीलमामुक्तमुक्तालतमस्यवक्षः य

अ.श्रे मोपमानस्योपमेयतास विपर्ययोपमा॥ यथा॥ अथ सुललितयोषिद्भ्रूलताचारुशार्ङ्गं रतिवलयपदाङ्के चापमासज्य कण्ठे सहचरमधुहस्तन्य
१४ स्तचूताङ्कुरास्त्रः शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा॥ इत्यादि॥ यत्रोपमानोपमेययोः संशयकोटितासा संशयोपमा॥ यथा॥ किमिदुः
किंपद्मं किमु मुकुरविम्बं किमु मुखं किमब्जे किंमीनौ किमु मदनवाणौ किमु दृशौ खगौ वा गुच्छौ वा कनककलशौ वा किमु कुचौ तडिद्वा तारा वा
कनकलतिका वा किमबला यत्र तयोरन्यत्वासाम्यलाभस्सा नियमोपमा यथा॥ कस्ते पुरन्दरादन्यः प्रतिमल्लो भविष्यति ऋते सहस्रकि
रणात्वत्प्रतापसमोहिकः यत्रोपमानान्तरविरहतात्पर्येण स्वसाम्यं सास्वोपमा॥ यथा॥ आघूर्णितं पद्मलमस्मि युग्मं प्रान्तद्युतिश्वेत्यजितामृतांशु
अस्याद्वयास्याम्बलदिन्द्रनीलगोलामलश्यामलतारतारम् अभेदानुमानवद्दिह भेदोद्रष्टव्यः यत्रोपमेयमुपमानविकारतयोन्मतेसाविक्रियोप
मा यथा॥ हरिणादृश तन्नयमादय पद्मात्पद्मपत्राच्च आहृत्य कान्तिसारं विधिरसृजत्सुभ्रुवो दृष्टिम्॥ श्रीपादस्तु॥ समभिव्याहारोपमाप्यस्ति:
सा यथा प्रकृत्यैव मनोहारि वदनं हरिणीदृशः चन्द्रेल्हादकता कस्मात्पद्मकेन परिस्कृतः॥ अत्र सर्वत्र॥ न्यूनाधिकत्वशंका चेद्विभागेषु तदि
ष्यताम् किंचिद्विशेषमादाय भेदोभेदश्च कश्चन काचित्समस्तान्वयिनी क्रियामात्रान्वया परा विशेषणान्वया काचिदुपमा कापि तत्परा॥ अ

ग्रथम्तूनतासन्नमाभिधीयवदेवाभिधीयते अहोकाव्यस्यमाहात्म्यंसमतैवप्रतीयते॥तदाहराजशेखरः॥समानमधिकन्यूनंसजातीयंविरोधिच सकुल्यं
सोदर्यंकल्पमित्याद्याः साम्यवाचकाः अलंकारशिरोरत्नंसर्वस्वंकाव्यसंपदाम् उपमाकविवंशस्यमातैवेतिमतिर्मम॥इत्यलंकारशेखरे अर्थालंकारेउपमाम
म्
रीचि॥अतिसाम्यादपह्नुतभेदयोरुपमानोपमेययोरभेदप्रत्ययोरूपकम् यदाह तद्रूपकमभेदोयउपमानोपमेययोरिति॥दण्डीच॥उपमैवतिरोभूतभे
दारूपकमिष्यतइति॥तद्विभजते॥विरुद्धंचसमस्तंचव्यस्तंरूपकम् श्लिष्टंचरूपकंतस्मात्तेषांपंचधास्मृतं तत्रयत्रोपमानविरुद्धोर्थस्तद्विरुद्धम् यथा
न
दृश्यानपरिभूयतेत्वमनागपि क्षीयतेनवाचरमवारिधेः पयसिलुप्तिमाविन्दति नचत्रिदशास्तुभुवांवदनकान्तिभिर्जीयते यशस्तुहिनदीधि
तिर्जीयतेकोपिभूमीपतेः॥समस्तंयथा॥तस्यावाहुलतापाणिपद्मंचरणपल्लवम् मुखेन्दुरस्मिभ्रमरौसर्वस्वंपुष्पधन्वनः॥व्यस्तंयथा॥
भुजौमृणालेवदनंसुधांशुः कुन्दानिदन्ताश्चरणौसरोजे स्मितंप्रसूनानिकरौप्रवालेपयोधरौभूमिधरौमृगाक्ष्याः॥रूपकरूपकंयथा॥मुखप
ङ्कजरङ्गेस्मिन्भ्रूलतानर्तकीतव नरीनर्तिलसत्स्वर्णकेतकीदललोचने॥श्लिष्टरूपकंयथा॥राजहंसोपभोगार्हंभ्रमरप्रार्थ्यसौरभम् पुरुष
तिसुषमांकांचिन्मुखपंकेरुहंतव इदंचसमस्तासमस्ताद्विभेदादनन्तम् लक्षणान्यत्रैवान्तर्भवति उपमानोपमेययोरभेदप्रतिपत्तेः॥अत्रापि

 सत्वात्॥तदुक्तम्॥रूपकंलक्षणादिकमिति॥साचद्विधा॥समस्तासमस्तभेदात्॥तत्राद्या यथा॥उदयतिकनकाचलयोरुपरिचलत्सङ्गजन्म
 नुः तदुपरिधनान्धकारः कस्यकृतेधातुरीदृशीसृष्टिः॥अन्त्यायथा॥तामरसेसालसताजलमुचिकश्चिद्विपर्यासः निस्यन्दतालतायांकथयति
कस्यापिपुण्यानि॥इत्यलंकारशेखरेरूपकमरीचिः॥अन्यनिमित्तकेवस्तुन्यन्यनिमित्तकत्वारोपणमुत्प्रेक्षायथा॥गमनमलसयातेः कुम्भ
वक्षींकुचाभ्यामविकलकरशोभामूरुकाण्डद्वयेन यदियमहरदेषांहेतुनानेननूनंनिजवपुषिकरीन्द्राः पांसुपूरंक्षिपंति॥इयंच॥सर्वालं
कारसर्वस्वंकविकीर्तिविवर्द्धिनी उत्प्रेक्षाहरतिस्वान्तमचिरोढास्मितादिव शंकेमन्येध्रुवंप्रायोनूनंजानामितर्कये इवेत्यादिभिरुत्प्रेक्षाव्य
ज्यतेकाव्यवर्त्मनि अन्यदभिप्रेत्यान्याभिधानं॥समासोक्तिः॥सैवचान्यापदेशः उच्यते॥यथा॥त्वंपीयूषदिवोपिभूषणमसिद्राक्षेपरिक्षेतकोमा
धुर्यंतवविश्वतोपिविदितामाध्वीकसाध्वीकथा एतत्किन्तुतवाप्यरुंतुदमिवब्रूमोनचेत्कुप्यसेयः कान्ताधरपल्लवेमधुरिमानान्यत्रकुत्रापिसः
किंचिदपह्नुत्यपरस्यार्थप्रदर्शनंसापह्नुतिः॥यथा॥सीत्कारंशिक्षयतिव्रणयत्यधरंतनोतिरोमांचम् नागरिकः किमुमिलितोनहिनहिसखिहैम
नः पवनः आरब्धानुकूल्याकस्मिकसहकारिलाभः समाहितम्॥यथा॥मानापनोदनविधौमदिरेक्षणायायावन्नमामिचरणावथतावदेव नीपस्व

सन्नवसमीरपुरः सराणिप्रादुर्बभूवुरविरलघनगर्जितानि यस्य वस्तुनो यत्स्वभावता तदाख्यानं स्वभावः॥ तदेव जातिरुच्यते यथा॥ चलतिक
र्णचित्रछायच्छति वार्धकर्षचिदालीनाम् आस्तिमेवहिमनुते गुरुगर्भभरालसा सुतनुः॥ विरोधो द्विविधः॥ तत्राद्यः पारमार्थिको विरोधेपि
श्रौचित्येन विरोधिता प्रतीयते यत्र सः॥ यथा॥ मनीषिताः सन्ति गृहेषु देवतेत्यादौ॥ द्वितीयस्तु यथा॥ श्रुते विरोधसंधाने पियत्राभिप्रेतमासा
द्याविरोधः अयमेव विरोधाभास उच्यते॥ यथा॥ भक्तानां कामदस्तुष्टो रुषा कामदहन्नपि अपिज्ञानमयः स्थाणुर्ध्येस्तमीशंस्तुवीमहि उत्त
रोत्तरं यत्र सारोत्कर्षः ससारः यथा॥ विषयेषु तावद्वलास्तास्वपि गोप्यः स्वभावमृदुवाचः मध्ये तासामपि सा तस्या अपि सा चिवीक्षितं कि
मपि समस्तवाक्योपकारकत्वं दीपकत्वम् तच्चाभिन्नं च तत्तत्कारकक्रियादिभेदादनन्तम्॥ अभिन्नं यथा॥ पाणौ पद्मधियेत्यादौ॥ भि
न्नं यथा॥ नृत्यन्ति निचुलोत्सङ्गे गायन्ति च कलापिनः वध्नन्ति च पयोदेषु दृशो हर्षाश्रुगर्भिणीः अत्र विस्तरभिया सर्वं नोदाह्रियते एत
न्मालादीपकभेदादनन्तम् अत्र पूर्वापरवाक्यार्थयोरुपकार्योपकारकं मालादीपकम् तत्रोत्तरस्य पूर्वोप कारकत्वम्॥ यथा॥ चारुता
वपुरभूषयदासां तामनूननवयौवनयोगः तं पुनर्मकरकेतनलक्ष्मीस्तां मदस्तमपि वल्लभसङ्गः॥ पूर्वस्योत्तरोपकारत्वं॥ यथा॥ सङ्ग्रामा

अ॰ प्री॰ ङ्गःसमागतेनभवताचापिसमासादिते देवाकर्णययेनयेनसहसायद्यत्समासादितम् कोदण्डेनशराश्शरैररिशिरस्तेनापिभूमंडलंतेनत्वं
१६ भवताचकीर्तिरतुलाकीर्त्याचलोकत्रयम्॥समानकालोक्तिःसहोक्ति सासाद्वयी उदासीनयोस्त्वराप्रतिपत्तयेकार्यकारणयोरपि॥आद्या
यथा॥सहदीर्घाममश्वासैरिमाःसंप्रतिरात्रयः समंममशरीरेणक्षीयन्तेदिवसाअमी॥अन्त्यायथा॥वर्धतेसहपान्थानांमूर्च्छयाचूत
मञ्जरी पतंतिचसमंतेषामसुभिर्मलयानिलाः प्रयोज्यप्रयोजकयोर्वैयधिकरण्यमन्यदेशत्वम्॥यथा॥साबालावयमप्रगल्भवचसःसा
स्त्रीवयंकातरास्सापीनोन्नतिमत्पयोधरयुगंधत्तेसखेदावयम् साक्रान्ताजघनस्थलेनगुरुणागन्तुंनशक्तावयंदोषैरन्यजनाश्रितैरप
टवोजाताःस्मइत्यद्भुतम् कारणेसत्यपिकार्याभावोविशेषोक्तिः॥यथा॥आवातिवारिधरशीकरवारिवर्षीस्वैरंकदंबवनदुर्ल्ललितःसमी
रः अङ्गेःपिबामिनलिनीनवपल्लवानितापस्तथापिसुदृशः शिथिलोनजातः कारणंविनाकार्योदयोविभावना॥यथा॥नाङ्गेषुरत्नाभरणा
निसन्तिनिश्वाससहार्य्याण्यपिनांशुकानि तथापिसासम्प्रतिसारसाक्षीदिनेदिनेकामपिकान्तिमेति॥केचित्तु॥अन्यदेशत्वमेवविशेषोक्ति
विभावने अधिकरणद्वयमाश्रित्य॥अन्येतु॥अनयोरेवैकेनापरस्यान्यथासिद्धिर्व्यतिरेकमादायइति गोवर्धनस्त्वन्यामेवान्यथा सिद्धान्य

देशत्वमेवविरायकार व्यतिरेकालंकारस्त्वतिरिच्यतद्यैकं ॥ सच यथा ॥ कादाचित्किं द्युतिं धत्ते कलङ्की क्षीयतेन्वहम् दोषाकरः कथंकारं
तवाननसमः प्रिये एकेनाप्रस्तुतस्याक्षिप्तिराक्षेपः सोपि द्विधा गीयते परैः ॥ यथा ॥ इन्द्रेण किं यदि स कर्णनरेन्द्रसूनुरैरावतेन किमसौ यदि त
द्विपेन्द्रः दम्भोलिनाप्यलमयं यदि तत्प्रतापः स्वर्गोप्ययं ननु मुधा यदि तत्पुरी सा सुखबोधाय बालानामतिकोमलवर्त्मना मया संक्षेपणादि
ममलंकाराः प्रदर्शिताः यथैतेषां मिथो भेदः परेषां नातिरेकिता तथालंकारसर्वस्वे सप्रपंचमदर्शयम् ॥ इत्यलंकारशेखरेलंकाररत्नम्
॥ उपमा काव्यसम्पदां सर्वस्वं सा च साधर्म्यमिति इदानीं तस्य प्रतियोग्यनुयोगिनावाह चन्द्रकलाम्बुजदामशिरीषविद्युत्ताराकनकलताच
दमनककांचनयष्टीदीपः सर्वैरभिन्नो विदूर्ण्या ॥ यथा ॥ शिखेव दीपस्य लतेव हैमी कलेव चान्द्री स्रजिवाम्बुजानाम् शिरीषपुष्पस्रग्हेमयष्टि
सामिककरालोचनगोचरोस्यात् दमनकतरुश्रवालम्बिकोलड़ युगं तुहिनकिरणबिम्बे खञ्जरीटप्रचारः विकचकमलकोशे दाडिमीबीजपंक्ति
स्थितयमिदमपूर्वं दृष्टमेकत्र चित्रम् तडिद्वा तारा वेत्यादौ उद्भिन्नयारलशलाकया वेत्यादि दर्शनात्तथात्वं वर्ण्यतद्वत्याहुः अत्यंतानंदसन्दोहदा
यिनी परिवर्ण्यते ॥ यथा ॥ साकौमुदी नयनयोरमृतैकवर्तिरानन्दपंकजवनी विलसल्लताभा प्राणास्मरस्यजनपुण्यतरोः फलानि सा फल्यमसि

जनुर्याङ्कगतानजाने शक्तिर्मूर्तिमतीस्मरस्यजगतान्नारीमयंमण्डनङ्कान्तानामुपमानकल्पनकलाकान्तेः समुत्तेजनम् लक्ष्म्याः संसृति
सागरस्यसरसीलावण्यपुण्याम्भसांसाराजव्रजचक्षुषांक्षणमभूदानन्दपण्यस्थली रोचनास्वर्णविद्युद्भिर्हरिद्राभिर्वराटकैः चम्पकैर्हेमकै
तक्याावर्ण्यतेतत्तनोर्द्युतिः॥यथा॥प्रत्यग्रपद्मवीजद्युतिकांचनकेतकच्छायं गोरोचनातिगौरंवपुरपिसाक्षात्कृतंतस्याः चम्पकदामहरिद्रा
काञ्चनसौदामिनीगर्भक्रेपपतिकान्तिमेषानिजवपुषापद्मपत्राक्षी॥इदमणुपलक्षणम्॥तामग्रतस्तामरसांतराभामित्यादेः चेत्रत्वचात्तु
ल्परुचांवधूनांकर्णान्तवीगण्डतलागतानि भृङ्गाः सखेलंपदिनापतिष्यन्कावेदयिष्यन्नवचम्पकानि॥इत्यादेश्च॥मोचात्वचःपञ्चषपाटला
नामित्यादेश्च काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमित्यादेस्तत्ताम्यमपिवोधव्यम् तमः शैवालपायोदबर्हभ्रमरचामरैः यमुना
वीचिनीलाश्मनीलाभ्राभीःसमःकचः॥यथा॥नजीमूतच्छेदःस्खलिगगनचारीनचतमोनचासेन्दीवैश्रीनचमधुकरास्तेहिमुखराः नपिच्छंत
त्केकिन्नुचितमसितोयंनचमणिर्मृदुत्वादाज्ञातंघनविकुरपाशोमृगदृशः जानामिजानकिकलिन्दसुताजलेस्मिन्स्नातासिहन्तपदिमास्तवकुन्त
लानाम् वीचीषुनीलकमलस्रजिशैवलेषुदृश्यंतएवरुचयःकणशःप्रकीर्णाः ताराविदानींवदमस्यचन्द्रं रुचाकचानांवनभोजयन्ती आकण्ठम

श्रोहिंतपंनधूनिमहीभृतः कम्पनभोजयन्ती कुर्यास्तेनस्थगितहृदया संपुटं हाटकीयं मस्तन्यस्तांचलनिवसना चामरं वारिदाभम् यत्रासीनार
तिरिव वणिक्प्रेयसीवीथिकायां विक्रीणीते मुकुलितमुखी संत्रयामौक्तिकानि अंगुल्याग्रैर्निर्दिशेद्रुणिमालासागुटीविभ्रमं वा चापद्वयमुद्
पारदघटीवुद्धिरस्यद्युतिः दृग्भंङ्ग्यापदिनीलिमावितनुते काचलजः प्रत्ययं विक्रेतुं वत मौक्तिकानि भवति त्वग्ग्रावणिक्प्रेयसी॥ इदमप्युपलक्ष
णम्॥ पुनः पुनः कांचनकुर्वतीकचच्छटाधिया धूपजधूमसंग्रहम् सखीस्मितैस्तर्कितवन्निजभ्रमावबंधतन्मूर्धजचामरं पिपात् इतिधूम
साम्येवोधम् पाशः पक्ष्महस्तक्वकलापर्यायाः कचास्त्वइतिरहस्यम् ललाटमर्धचन्द्रेण हेमपट्टिकया तथा केशान्धकाराद्यहस्यभालस्य
लक्ष्येचन्द्रात्स्फुटमष्टमीयम् एतांयदासाद्यजगज्जयाय मनोभुवा सिद्धिरसाधिसाधु अधस्तादन्धकाराणामुपरिष्टात्कुरंगयोः सिन्दूरविन्दुशुभ
गारहस्याकनककपट्टिका वल्लीस्मरधनुर्वीचिभृकुंलीपल्लवैर्भुवौ॥ यथा॥ अयमुललितयोषिद्रूलताचारुशार्ङ्ग मित्यादि श्यामास्वंगं चकितहरिणी
प्रेक्षिते दृष्टिपातान्वक्त्रच्छायां शशिनिशिखिनां वर्हिभारेषु केशान् उत्पश्यामिप्रतनुषु नदीवीचिषु भ्रूविलासान् हन्तैकस्मिन्क्वचिदपि न ते चण्डि
साहश्यमस्ति भ्रूपल्लवं मधुपराजिरुचां निधिस्ते गण्डस्थलीकनकदर्पणदर्पहन्त्री हेकम्बुकण्ठि शुक किन्नरहंसवाणि प्राणा ममासि मदनस्य च जै

अ०शे त्रमलाम् चन्द्रादर्शौ कपोलस्य सुव्यक्तमव्यवहितश्लोकद्वयं पाणौपद्मधियामधूककुसुमभ्रान्त्यापुनर्गण्डयोरित्यादिदर्शनात्तथात्वमपि
१८ वर्ण्यते मुखस्येन्दुकन्दर्पणाः किमिन्दुः किंपद्मं किमु मुकुरविम्बं किमु मुखमित्यादौ तिलप्रसूनेनाशायाः। यथा॥ बन्धूकद्युतिबान्धवोय
मधरः स्निग्धो मधूकच्छविर्गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचनं लोचनम् नाशान्वेति तिलप्रसूनपदवींकुन्दाभदन्ति प्रियेप्रायस्त्वन्मु
खसेवया विजयते विश्वं स पुष्पायुधः कामतूणीकृत्य नासा वर्ण्यते इति श्रीहर्षः नाशा वंशो मृगीदृशाम् नासानालीतिलोपममि सपिपक
न्तिकण्ठः कम्बोः समः स्मृतः॥ यथा॥ हेकम्बुकण्ठि इत्यादौ कम्बुग्रीवेतद्देवाष्टमान्य इत्यादौ मृगतन्नेत्रपाथोजतत्पत्रझषखञ्जनैः ने
त्रस्याभीरतन्नेत्रकेतकालिस्मराशुगैः॥ यथा॥ चकोरनेत्रेण दृगुत्पलानां निमेषयन्त्रेण किमेष दृष्टः सारः सुधोद्गारमयः प्रयत्नाद्विधातुमेत
त्स्यपनेविधातुः हरिणादयतनयनाद्यपयात्यत्रपत्रश्चेत्यादि किमब्जे किं मीनावित्यादि नयनेखञ्जनकमले बाहू बिलसन्मृणालविस
खण्डे मधुरपि शिरीषपुष्पं मुखमिन्दुस्त्वं शरत्समाः चकार सामन्तचकोरनेत्रा विलोलनेत्रभ्रमरैर्गवाक्षा पूर्णादलैः काञ्चनकेतकीनाम
होवपूर्वं दृष्णोवदृष्टिः॥ केचित्तु॥ कोशातकीपुष्पसमानकान्तिभिर्मुखैर्विनिद्रोल्वणबाणचक्षुषः ग्रामीणवध्वस्तमलक्षिताजनै ध्रुवं धृतीनामुप

[illegible]म् इतिमापरशंसन्त्कोशातकीत्वेनमुखंबाणत्वेननेत्रंवर्णनीयमितिवदन्ति॥ अन्येतु॥ तयाप्रबुद्धानमचन्द्रकान्त्याप्रफुल्लच
क्षुः कुमुदकुमाप्याः प्रसन्नचेतस्सलिलः शिवोभूत्संस्पृश्यमानः शरदेवलोकः इतिदर्शनान्नेत्रंकुमुदोपममित्याहुः प्रवालबिम्ब
[illegible]बंधूकपल्लवैरधरोष्ठकौ वर्ण्यौ माधुर्यमाश्रित्य यावन्मधुरवस्तुभिः पुष्पंप्रवालोपहितंयदिस्यान्मुक्ताफलंवास्फुटविद्रुमस्थम् ततो
नुकुर्याद्विशदस्यतस्यास्ताम्रौष्ठपर्यस्तरुचः स्मितस्य तन्वीश्यामा शिखरदशनापक्वबिम्बाधरोष्ठी मध्येक्षामा चकितहरिणीप्रे
क्षणानिम्ननाभिः श्रोणीभारादलसगमनास्तोकनम्रास्तनाभ्यां यातत्रास्ते युवतिविषये सृष्टिराद्येवधातुः बंधूकद्युतिबान्धवोयमध
रः [illegible]जवाप्यत्रवर्णनीयेतिगोवर्द्धनः माधुर्यमाश्रित्येत्यादि यथा॥ त्वंपीयूषदिवोविभूषणमसीत्यादौ मुक्तामाणिक्यनारंगदाडिमीकुन्द
[illegible]भिन्नवरत्नावर्ण्याः कुर्यात्सेनस्थगितेत्यादौ तन्वीश्यामाशिखरेत्यादौ तदन्तानागरंगानिकोलङ्गनिपयोधरौ ओष्ठाधरौचवि
[illegible]फलमयीप्रिया दमनकेत्यादि बंधूकद्युतीत्यादि॥ तत्कोरकैर्यथा॥ अधरः किशलयमेषोपद्मोकुन्दस्यकोरकादन्ताः कः कोके
[illegible]काम् प्रहसतिहसतीहसन्तिहरिणाक्ष्याः ताराः दन्तानामित्यादि वाणीहंसालिशुककिन्नरैः वेणुकोकिलवीणाभिर्माधुर्यमधुरैः सह य

अ॰ शे॰ यथा॥ हेकम्बुकण्ठिशुककिन्नरहंसवाणीत्यादि तस्यमोपुर्हि रेफाणांकर्णोत्पलनिपातिनाम् स्वरसंवादिभिः कण्ठैः शालिगोप्योजगुर्गुणान् क
९६ ण्ठः किमस्याः पिकवेणुवीणास्तिस्रोजितासूचयतित्रिरेखः इत्यन्तरास्तूयतकाचिदननलेनभैमीकलमालपन्ती माधुर्यमित्यादि मधुद्रोणी
विमन्दामन्दामन्दवृष्टिवत् सुधासारइवद्रासाणीवाणीतवप्रिये बाहुर्विसेनविद्युद्वल्लिमृणालैर्विसमृणालयोरवान्तरभेदविवक्षयोक्तम् अ
स्याभुजाभ्यांविजिताद्विसात्किं पृथक्करोगृह्यततन्मसूनम् इहेस्तेतन्तुगृहाश्रितैः कैर्नगीयतेवाकरएवलोकैः विद्युन्मृणालसुभगावाहुवल्लिमृ
गीदृशः पूर्वान्तुकण्ठकाण्डेषुजाताकनकशृङ्खला करस्तुपद्मेनपल्लवविद्रुमाभ्याम् करकिशलयेनसुदृशारागसरित्पंकजेनेव शिथिलितविद्रु
ममहसास्पष्टोहंचेतनांनलेभे चन्द्रकलाकुन्दकोरकैर्नखाः यथा॥ निर्भर्त्सिताशोकदलप्रसूतिपाणिद्वयंचारुनखंतदीयम् नवोदितेन्दुप्रतिम
स्यशोभांशोम्नः प्रदोषेविफलीचकार निर्दोषरत्नसुभगैः कुन्दकोरककान्तिभिः नखैः कमलपत्राणिबालाचक्रेपृथक्पृथक् पूगाञ्जतवकोर
कबिल्वतालगुच्छेभकुम्भाद्रिघटैः स्तनैः सौवीरजंवीरकबीजपूरसमुद्गकोलङ्गफलैरुरोजः यथा॥ कनककुम्भकायितंपुरस्तादथपङ्केरुहकोर
कायमानम् क्रमशः कमलायमानमासीत्सुदृशोवक्षसिकस्यभागधेयम् कलशीयतिकुचकमलंकमलीयतिलोचनभ्रमरः अणुकीयतिपुनरस्या

हरिणदृशः प्रत्यहंमध्यः स्तनविल्वद्वयीलस्याः प्रपयौचक्रवाकताम् उड्डीयपुनरुद्गीर्णाजहारविपुलश्रीयम् चिरप्रवासिंस्तववाटिकायांवि
भर्तिबिल्वानिफलानिपीक्त सौवीरजम्बीरकवीज पूरतालान्यसौधास्यतिकिंनजाने स्वर्गोवागुच्छौवेत्यादिस्वयंभूः शंभुरंभोजलोचनेत्वत्प
योधरः नखेनकस्यधन्यस्यचन्द्रचूडोभविष्यति संपुटंहाटकीपमित्यादि मनकतरुशाखालम्बिकोलद्वयुग्ममित्यादिमहतोपिमहीयांस
मपियांसमणोरपि तत्प्रतीकं बिदुर्नूनमणुमध्येनभस्तनि रेखाकान्तातिसुभ्रुया मारोमालिस्तेनतादृशैः शैवालधूमभृंगालिलताद्यैरुपमी
यते नाभीबिलादुच्चलिताभुजङ्गीरोमालिरास्येन्दुसुधालिलिप्सुः समीक्ष्यकेशावलिवर्हिमालामुरोजगिर्योः समलीयतान्तः सुगममिदम् नाभी
रसातलमर्त्सदूद्वकूपनदादिभिः यथा॥ मदनसरितमेतांगाहमानोजनोसौजघनपुलिननाभीमण्डलावर्तरम्याम् मुखकमलसनाथामुल्लस
त्कूलसीमांचिरविरहतुताशापासमुज्झाञ्चकार त्वन्नाभिकूपः पातालेनितम्बस्तवमेदिनी पयोधरस्तेहेमाद्रिस्त्वंममासिजगत्त्रयम् हृदनदस्तौ
सिमामिस्त्रिवलीतटिनीरसात्मकस्त्ववपुः तदपितलोदरिसंप्रतिकथमिवसंतापमातनुषे वलीतटिन्यातद्रूपैस्तत्समैः पाशादिभिस्तदाह त्रि
वलीपारीस्त्रमातपावद्धः कामस्यसोपानमिवप्रयुक्तमितिष्टष्ठंकांचनपट्टकैः मुक्तावलिस्तेरदनाः पृष्ठंकांचनपट्टकम् नखांशवस्तेरत्नानिम

अ॰ पीत्यास्ति किंप्रिये सूक्ष्मग्रतलशून्याणुवेदीसिंहादिभिः समः मुष्टिग्राह्यो भवेन्मध्यः अत्र मध्यस्यातिसूक्ष्मतयातत्प्राधान्येनोपमानता अत
२॰ एवमुष्टिग्राह्यतातत्प्रमाणता सूक्ष्मत्वादेव मध्ये शून्यता च अत एव सदृशत्वं संशयगोचरोदरीत्यपि वर्णयन्ति जघनं पुलिनोपमं॥ यथा॥ मद
मन्थरितमेतामित्यादि पीठप्रस्तरभूचक्रैर्नितम्बः परिवर्ण्यते॥ यथा॥ नितम्बः स्वर्णपीठस्ते तवाङ्गुल्यग्रपल्लवाः ज्योत्स्नेन्दु पुष्पपीयूषके
मयशिरस्मितं तव तपनीयशिलाशोभाकटिरित्यादि नितम्बस्तव मेदिनीत्यादि चक्रेण विम्बं युधि पुष्पकेतुः पितुर्जितं वीक्ष्य सुदर्शनेन ज
गज्जिगीषस्य मुना नितम्बमयेन किं दुर्लभदर्शनेन विभ्रम्य वक्षोरुहनितम्बचक्रे दूतस्य दृक् तस्य खलु स्खलन्ती स्थिरा चिराद् स्तनदूरम्॥
स्वभावु पार्श्विभ्यकरेणगाढम् रथचरणविशालश्रोणिलोलेक्षणे चेति माघ। अत्र क्रान्तरद्वयसाम्यमप्यत्र ऊरुस्तु करिहस्तेन कदल्या करभेन च॥
यथा॥ कदली कदली करभः करभः करिराजकरः करिराजकरः भुवनत्रितयेऽपि विभर्ति तुलामिदमूरुयुगं न चमूरुदृशः चरणः पल्लवाम्भोजसम
नयप्रवालकैः यथा॥ विजितप्रवालपल्लवककवलीकृतप्रोल्लसत्सुषमे पदकमले कमलापाः लुठदलकः पातु देवकीसूनुः अभ्युन्नतांगुष्ठनखप्र
भाभिर्विक्षिपन्ती द्युगामिवोद्भिरं तौ आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्याम् पूर्णेन्दुनाङ्गुष्ठनखं॥ यथा॥ यशः पदाङ्गुष्ठनखं

स्वेव विभक्तिपूर्णेन्दुवतुरर्यथा कलाम्बुतः षष्ठिरूपैतिवासंतस्पांकथे सुभुविमानननास्यात् गमनेहंसहस्तिवत्॥ यथा॥ गमनमलसमतैरिस्या
स्वेव विभक्तिपूर्णेन्दुवतुरर्यथा कलाम्बुतः षष्ठिरूपैतिवासंतस्पांकथे सुभुविमानननास्यात्
रि साराजहंसैरिवसंन्नतांगीगतेषुलीलाञ्चितविभ्रमेष्वित्यादौ कटाक्षाप मुनावीचिभङ्गावलिविषामृतैः हालाहलम्वाविलसत्सुधावाभृङ्गाव
लीवापमुनेर्मयोवा निशाणवृष्टामदनेषवोवापद्वाकटाक्षाहरिणेक्षणायाः ज्योत्स्नेन्दुपुष्पपीयूषफेनकैरवकन्दुकः इत्यादि हसोहास्यं॥ यथा
ज्योत्स्नापुष्पपीयूषइत्यादि नूनंतेचोरितातन्वि स्मितेक्षणमुखद्युतिः स्नातुमंभः प्रविष्टायाः कुमुदोत्पलपङ्कजैः मुक्तापद्मगणनीया मुक्ता
फलेवास्फुट विद्रुमस्पमित्यादेः दर्शनैवमदन्तादि यथा॥ धवलपद्विजगदखिलंज्ञावयदिषविम्बमेवविशिखेचे: वमदिषकमलसहलेलोच
नमणीरशोजयति श्वासस्सुसुरभिसमः वहन्तिप्रातरंभोजसौरभोद्गारवासिताः मंदंमंदममीवातानिश्वासास्तावकाइव हंससारसशब्दाभ्यांव
र्ण्यतेनूपुरध्वनिः॥ यथा॥ साराजहंसैरिवेत्यादि लीलाचलत्श्रीचरणारुणोत्पलस्फुरत्तुलाकोटिनिनादकोमलः शौरेरुपानूपमपाहरन्मनःस्व
रान्तराद्दुन्मरसारसारवः अत्रश्रीपादानुसारिकविकल्पलताकारएतावदधिकमाह वेण्याः सर्प्याः सिभृंगाल्योधम्मिल्लस्यविधुंतुदः सीमन्तस्या
ध्वदण्डोवभुवौः सप्यकृपाणकौ दन्तस्यजीरकान्तेयामदिषकुमुदेदृशोः जिव्हापाल्लवलोदोलानासायाः पाटली तथा॥ वल्लरीलहरीपाशः स

अ॰शे॰ स्यामाहृदयस्य च प्रवालशास्तेऽङ्गुल्यः पल्लवस्य नखस्पष्टु रक्तपुष्पाणि नाभ्यास्तु विवराम्भोरुहे स्मे वीचिसोपाननिश्रेण्यस्त्रिवल्या इति च
२१ त्रिपाः पुंसामुरुस्तु करिकुम्भौ स्कन्धस्य सन्निभौ भुजौ वज्रस्य गमनमुस्गामित्यपि कीर्तितम्॥ गोवर्द्धनस्तु॥ शरीरलक्षणपक्षयोर्वर्णनीया
मुखमाधुर्यमार्दवं मृदुता कार्ष्यमतिकोमलता तथा कान्तिरौज्ज्वल्यमाचल्यमित्येते वपुषो गुणाः केशस्य दीर्घकौटिल्यमृदुत्वमिश्रनीलताः क
पोलयोः कृशता कण्ठे ग्रीवायास्त्रिरेखता नेत्रे स्नैग्ध्यं विशालत्वं लोलतापाङ्गदीर्घता नीलताप्रान्तलौहित्यं श्वेत्यं निम्नपक्ष्मता अधरे त्वन्तना
पुष्टिमुखसंवृतता रन्तस्य श्वेतलौहित्यं द्वात्रिंशत्वातिदीप्तता माधुर्यस्पष्टता वाचां मृदुता समता भुजे करे विमृदुताशैत्यं सर्वभागे
नखेषु [illegible] स्तने श्यामाग्रतानत्वविस्तारदृढपाण्डुताः रोमावल्यां मार्दवं सौक्ष्म्यं श्यामता नाभिगामिता कान्तिर्वृत्तानुपूर्वत्वं जंघयोर्नातिदीर्घता
अरुणत्वं नखानां नि श्वासे तु सुगन्धिता॥ इत्यादि॥ यथा संक्षेपशीलेन गच्छता मृदुवर्त्मनि सर्वेषामविरोधेन दिङ्मात्रमिह दर्शितम्॥ इत्य
लंकारशेखरे योषिद्वर्णनमरीचिः॥ इदानीं पुरुषवर्णनमाह॥ उन्नतत्वमत्यन्तपीनत्वमुच्चता दीर्घबाहुता अत्र पुंसामिति वक्तव्ये प्रायशः कवीनां
ज्ञातव्यं वर्णनीया भवन्ति तानन गहन नाममहर्षि पदानामित्युक्तम् यथा॥ व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः॥ इत्यादि॥ युगार्गलभुजः

न्द्रवएवस्न यो ऽ हलक्षैः बाहु ॥ यथा ॥ युगायुगव्यायतबाहुरित्यादि भुजेभुजंगेन्द्रसमानसारे इत्यादौ अमुष्यदोर्भ्यामरिदुर्गलुंठने ध्रुवं गृहीता
गलदर्गलशृंखलता [illegible] प्रसारिता नागेन्द्रगमनः पीनमैरावतकरायतम् दोर्द्वंद्वं भुवनागारस्तंभराजा
[illegible]मर्गसः बाहु कपाटेन शिलापट्टेन वर्ण्यते ॥ यथा ॥ युगायुगव्यापतबाहुरं [illegible] इत्यादि मध्ये कार्श्यम् ॥ यथा ॥ भवन्तिनाथोयमुदग्रबाहु विशा
लवक्षास्तनुवृत्तमध्यः इत्यादि ॥ उन्नततापदे यथा ॥ कूर्माकारं चरणयुगलं धृतदिग्दन्तिशुण्डादण्डावूरू भुजयुगमपि व्यक्तनागेन्द्रशोभम् प्रायः
[illegible]धिपयेतत्समयोन्यदार्था नेकीकृत्य त्रिभुवनसृजा निर्मिता यस्य मूर्तिः स्तनयोरिव नारीणामत्यन्तस्वच्छता हृदि ॥ यथा ॥ सा
निर्मितेतस्य मधुकमालाहृदि स्थिता च प्रतिबिंबिता च ॥ ❧ ॥ ❧ ॥ किं पत्यमग्ना किं पतीव मग्ना पत्न्येषु [illegible]लोकि नारी स्त
न[illegible] ॥ यथा ॥ प्रतिफलितं गलगरलं कज्जलतुल्यापयोधरे देव्याः प्रातः प्रोञ्छितुमिच्छन् गिरिजाहसितो हरो जयति कान्तिप्रयोजकं चाव स्ता
[illegible]वर्ण्यते [illegible] यथा कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रतौ तयोः प्रवालैर्वनयोस्तथाम्बुजैर्नियोद्धुकामे किमु बद्ध
[illegible] [illegible] प्रांशुर्वरहारवक्षाहृद्भुजः प्रकृत्येव शिलोरस्कः सुव्यक्तो हिमवानभूत् चन्द्राननचन्द्रदिंगमृगलोचनमृगशिरस्तनसन्नम् कामकम्

अ॰ शे॰ लपन्नाणामेतेतस्यानुकारिणीइत्यादि॥विस्तृतमन्यत्रइदमुपलक्षणम्॥आह्लादत्वपुरस्कारेणचन्द्रादिसाम्यमुभयोरपि॥यथा॥इतिद्विजेनद्विज
२२ राजकान्तिरित्यादि इन्दुप्रभामिन्दुमतीवभावेइति स्फुरत्कमलपत्राभइतिश्रुतबोधेप्रतापोग्न्यादिवज्राद्यैः कीर्तिश्चन्द्रादिशुभ्रकैः करेपद्मोर्ध्व
रेखादिपदेच्छत्रध्वजादिकम् गमनेहस्तिसिंहाभ्यांकार्कश्यंचभुजादिषु॥स्फुटमिहोदाहरणम् गमनेयथा॥पूर्वंयथादेवपतेर्नियोगमूर्द्धावह
न्कार्मुकबाणहस्तः प्राप्तस्तथैवामुगजेन्द्रगामीप्रोद्भिद्यमानोनवयौवनेन ततोमृगेन्द्रस्यमृगेन्द्रगामीत्यादि स्युरुत्तरपदेव्याघ्रपुङ्गवर्षभकुञ्ज
राः सिंहशार्दूलनागाद्याः पुंसिश्रेष्ठार्थवाचकाः आदिपदादृषभोपिकर्तव्यात्स्वसिंहाद्या नरराजादितः परात् विशेष्यभावोह्युसदांनरभूमिवि
शेषणात् यद्यत्वामुद्रिकायुक्तन्तद्दूर्ण्यमुभयोरपि किन्तुशिष्टप्रयोगोऽत्रमयाकस्यतयेष्यते॥इत्यलंकारशेखरेपुरुषवर्णनमरीचिः॥इदानीं
सादृश्यप्रापकप्रकाशनाह इवाद्यैः प्रतिमानाद्यैस्समानाद्यैर्निभादिभिः वंधुचौरादिवैराद्यैः सादृश्यप्रतिपत्तयः॥तदाहुः इवाद्यैरिति॥इवव
द्वायथाशब्दाः समाननिभसंनिभाः तुल्यसंकाशनीकाशप्रतिमाप्रतिरूपकाः सदृक्सदृशसंवादिशब्दाः सादृश्यवाचकाः॥प्रतिमानाद्यैरि
ति॥प्रतिमानंप्रतिबिंबप्रतिमाप्रतियातना प्रतिच्छायाप्रतिकृतिरर्चापुंसिप्रतिनिधिरुपमोपमानंस्यात्॥समानाद्यैर्निभादिभिरिति॥वाच्य

लिंगाः समानश्च सदृक्षः सदृशः सदृक् साधारणः समस्तुल्यः स्युरुत्तरपदे त्वमी । निभसंकाशनीकाशप्रतीकाशोपमादयः । बंधुरिति । बन्धुर्मि
त्रं वयस्यश्च प्रेम्णा नु प्रीतः सुहृत् सखा उपमानोपमेययोरेवम् ॥ चौरेति ॥ चौरैकागारिकस्तेनदस्युतस्करमोषकाः प्रतिरोधिपरास्कन्दिपाट
च्चरमलिम्लुचाः मुखकान्तिचौरश्चन्द्र इत्यादि कर्तव्यम् ॥ अरीति ॥ रिपुवैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः द्विड्विपक्षाहितामित्रदस्युशात्रवश
त्रवः अभिघातिपराराति प्रत्यर्थिपरिपन्थिनः चंद्रस्य वैरिमुखमित्यादि कर्तव्यम् ॥ वंशाद्यैरिति ॥ संततिर्गोत्रजननकुलान्यभिजनान्वयौ वं
शोऽन्ववायः संतानः सपिंडास्तु सनाभयः समानोदर्यसोदर्यसगर्भ्यसहजाः समाः सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः चन्द्रगोत्रं
चन्द्रसोदरं मुखमित्यादि कर्तव्यम् ॥ प्रकारान्तरमाह ॥ भृतकाद्यैश्च भृत्याद्यैर्न्यक्कारार्थैः क्रियापदैः सन्देहवततद्वाक्याद्यैः सादृश्यं प्रतिपद्यते
भृतकाद्यैरिति भृतको भृतिभुक्कर्मकरो वैतनिकश्च सः मुखस्य भृतकश्चन्द्र इत्यपि बोद्धव्यम् ॥ भृत्याद्यैरित्यादि ॥ भृत्ये दासेयदासेरदासगोप्य
कचेटकाः नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः मुखदासः शशीत्यादि कर्तव्यम् ॥ न्यक्कारार्थैरिति ॥ न्यक्करोति तिरस्कुर्वन् प्रतिक्षिपति भ
र्त्सतीति आक्रोशत्यवजानाति कदर्थयति निन्दति विडम्बयति संरुधे हसतीर्ष्यत्यसूयति त्वन्मुखं चन्द्रं न्यक्करोति इति ध्येयम् तृणीकृतमधि

अ०चि० सिपुनिरस्तं चलघुकरम् अनाहतमवज्ञातमम्भोजंत्वन्मुखेन्दुना॥ सन्देहेति॥ यथा॥ किमिन्दुः किंपद्ममित्यादि तत्तद्वाक्यैरिति॥ तस्यपुष्णाति
२३ सौभाग्यं तस्य कान्तिं विलुम्पति तेनसार्द्धं विगृह्णाति तुलान्तेनाधिरोहति तस्य कक्षां पदं धत्ते तस्य कक्षां विगाहते तमर्थमनुबध्नाति तच्छीलं त
न्निषेधति तस्य चानुकरोतीति तमर्थमनुविंदति आकारयत्याह्वयते जिगीषति सस्पृहम् विधिरम्भोजसाम्राज्ये मुखेन्दुमभिषिञ्चति तस्या
मुखेन सह पंक्त्यञ्चन्द्रं कर्तुमिच्छति भवतीन्दुर्नदासोपि त्वदास्यं चेत्किमिन्दुना चन्द्रमूर्ध्निपदं धत्ते यथा चंद्रप्रतप्यसि लीयते चन्द्रमाः क्वा
पि बिभेति लज्जापयते॥ दृष्टान्तु॥ प्रतिच्छन्दसरूपादि सजातीयानुवादिनः सलक्षणसपक्षाभसवर्णतुलितादिकम् कल्पदेशीयदेशादि ये चान्यू
नार्थवाचिनः समासश्च बहुव्रीहिः शशांकवदनादिषु भवन्तीवादिशब्दाश्च सादृश्य प्रतिपत्तये॥ इत्याह॥ कवीनां घटनान्येव चराचर विलक्षण
भकर्तुमन्यथाकर्तुं कर्तुं वा समते जगत्॥ इत्यलंकारशेखरे वर्णकरत्नम्॥ इदानीं कविसंप्रदायस्य सर्वापेक्षयाभ्यर्हितत्वं दर्शयन्नाह॥ असतो
पि निबन्धेन सतामप्यनिबन्धनात् नियमस्य पुरस्कारात् संप्रदायस्त्रिधा कवेः असतोपीति वस्तुगत्या यन्न भवति तदपि कविभिर्वर्ण्यते॥ यथा॥ र
लानि यत्र तत्राद्रौ हंसा यत्र जलाशये जले भाव्यं नभोनद्यामम्भोजाद्यं नदेष्वपि तिमिरस्य तथा मुष्टिग्राह्यत्वं सूचिभेद्यता शुक्लत्वं कीर्तिपुण्यादे

कार्ष्ण्यंचकीर्त्यघादिषु प्रतापेरक्तताजलधेरक्तत्वंक्रोधरागयोः ज्योत्स्नापानंचकोराणांप्रवालंसर्ववीरुधाम् केसराशोकयोःस्त्रीगण्डूषात्पाद
पाततः मासमक्षेपिपुष्पाणिनेमालिहिबलिहियथाम् ॥ सतामपीति पारमार्थिकमपिननिबध्यते ॥ यथा ॥ वसन्तेमालतीपुष्पंफलपुष्पेचचन्दने
कामिदन्तेषुकुन्दानांकुड्मलेषुचरक्ततानारीणंश्यामतापातःस्तनयोर्विप्रवातथानियमस्येति हिमवत्येवभूर्यत्वंचन्दनंमलयेपरम् हेमन्त
शिशिरेपद्मनाशंचकमलस्थितिः ॥ किंच ॥ सामान्यग्रहणेशौक्ल्यंपुष्पाणांकृष्णवाससाम् ध्वजचामरहंसानांहारस्यवकभस्मनोः कृष्णत्वंस
र्पस्याहिमेघवारिधिवीरुधाम् भिल्लकाचासुराणांचधूमपंकशिरोरुहाम् लौहित्यंधातुमाणिक्यजवापल्लवविवस्वताम् पद्मपल्लवबन्धूकदा
डिमीकरजादिषु पीतत्वंशालिमण्डूकवल्कलेषुपरागके वर्षास्वेवशिखिप्रौढिर्माधवेचपिकध्वनिः ॥ अन्यच्च ॥ कमलासम्परोः कृष्णहरितो
र्नागसर्पयोः पीतलोहितयोः स्वर्णपरागाग्निशिखासुच चन्द्रेशशेषयोः कामध्वजेमकरमत्स्ययोः दानवासुरदैत्यानामैक्यमेवाभिसंहितम्
॥ अपि च ॥ वितन्तनस्यापितथाशिवचन्द्रस्यबालता मानवामौलितोवर्ण्या देवाश्चरणतः पुनः भुवनानिनिबध्नीयाच्छ्रीणिसप्तचतुर्दश चतस्रो
ऽष्टौदशदिशश्चतुरः सप्तवारिधीन् अष्टादशस्मृताविद्याः चतस्रश्चचतुर्दश येऽस्मस्तेजलजाश्चाभिन्नरन्ध्रकरणेमृताः महत्त्वमादिसर्गान्ते

अ.शे. गृह्यन्ते जगतामपि शैलादिर्भिद्यते शब्दान्नभः पूर्तिरथोद्गमं नामतत्तदुपाधीस्यात्कङ्केरोवृषवाहनः चिह्नत्वेनवृषाङ्कोयंध्वजेसत्वाद्वृषध्व
२४ जः खलीनसर्पीगिरिशः शशीनहरिणोविधुः इन्दुमौलिर्महादेवोगंगामौलिर्नतुक्वचित् रलयोर्डलयोश्चैवबवयोः सशयोर्न्नभित् नानुस्वा
रविसर्गौचचित्रभङ्गस्यसम्मतौ इत्यवहाहिहीहस्मउतवैतुकिलैवच पदान्येतानिदेयानिपादस्याद्येनजातुचित् भूतेन्द्रभारतेशास्त्राक्रमह
त्वन्देशनिरर्थकः दुरर्थोब्राह्मणोच्छिष्टिभोज्योपध्यादिषु॥इत्यलंकारशेखरेसंप्रदायरत्नेनियममरीचिः॥अथसंक्षेपेणवर्णनीयमाह॥वर्ण्य
श्वराजमहिषीचदेशोग्रामःपुरीसरित् सरोब्ध्यरण्योद्यानाद्रिप्रयाणरणवाजिनः हस्त्यर्कचन्द्राश्चतवोविवाहोथस्वयंवरम् सुरापुष्पाः स्वसम्भो
गविच्छेदमृगयाश्रमाः कालान्तरंवयःसन्ध्याध्वान्तदूत्याभिसारिकाः॥अथैषांविशिष्यवर्णनमाह॥नृपेकीर्त्तिः प्रतापाज्ञादुष्टशान्तिविवेकिताः
धर्मप्रयाणसंग्रामशस्त्राभ्यासनयक्षमाः प्रजापालारिशैलादिनिवासोरिपुशून्यता औदार्यधैर्यगाम्भीर्यैश्वर्यसौन्दर्यमादयः देव्यांसौभाग्यलावण्य
शीलशृङ्गारमन्मथाः नृपाचातुर्यदाक्षिण्यप्रेममानव्रतादयः देशोबहुरत्ननिष्पण्यधान्याकरोद्भवाः दुर्गग्रामजनाधिक्यनदीमातृकतादयः
ग्रामेधान्यलताहृस्वसरसीपशुपुष्टयः सैन्याद्रिरुद्धकेदारग्राम्यस्त्रीमुग्धविभ्रमाः पुरेट्टपरिखावप्रप्रतोलीतोरणध्वजाः प्रासादाध्वप्रपारामवा

नौकासरोजनदी सरिदम्बुधियापित्सवीच्योवनगजादयः पद्मानिषट्पदाहंसचक्राद्याकुलशालिनः सरस्संभोलहर्म्यभोगजायंबुजषट्प
दः हंसचक्राद्यस्तीरोद्यानस्त्रीपान्थकेलयः अब्धौ द्वीपाद्रिरत्नोर्मिपोतपोताराजलप्लवाः विष्णुकुल्यागमश्चन्द्रशुद्धिरौर्वाग्निपूरणम्॥अरण्ये
हिंस्रसिंहमृगसिंहादयो द्रुमाः काकोलूककपोतादयो मिश्रभल्लूकादयः उद्याने सरणिः सर्वफलपुष्पलतादयः पिकालिकेलिहंसाद्याः क्रीडा
पथ्याजगत्स्थितिः शैलेमेघौषधीधातुवंशकिन्नरनिर्झराः शृङ्गपादगुहारत्नवनजीवाद्युपत्यकाः प्रयाणेभेरिनिस्वानभूकम्पबलधूलयः
करभोक्षश्च जनप्रवणिक्शकटवेसराः पुरे तु वप्रबलवीररजासितूर्यनिर्घोतनादशरमण्डपरत्ननराः छिन्नातपत्ररथचामरकेतुकु
म्भियोधाः सुरीवलभटाः सुरपुष्पवृष्टिः अश्वेवेगित्वमीनत्वतेजः सल्लक्षणस्थितिः खुरोत्खातरजः प्रौढिजातिर्गतिविचित्रता गजेसह
मदोत्थितस्मसुरूत्ताकर्णचापलम् अरिव्यूहविभेदित्वं कुम्भेमुक्तामरालयः॥सूर्येरुणतारविमणिचक्राम्बुजपथिकलोचनप्रीतिः तारेन्दुदीपकौ
शकुलूकतमश्चौरकुमुदकुलटार्तिः चन्द्रेकुलटाचक्राम्बुजचौरविरहितमोर्तिरौज्ज्वल्यम् जलनिधिजननेत्रकैरवचकोरचन्द्रास्मरप्रतिप्रीतिः
सुरभौ दोलाकोकिलमलयसिगन्धवातद्रुपल्लवोद्भेदाः जातीतरपुष्पचयाद्रुममञ्जरीभ्रमरझंकाराः ग्रीष्मे पाटलमल्लीतापसरः पथिकशोषवाते v ल्काः

अ॰ चे॰ सक्तुप्रपाप्रपालीमृगतृष्णाम्रादिफलपाकाः वर्षासु घनशिखिस्मयहंसगमापंककंदलोद्भेदो जातीकदम्बकेतकभञ्झानिलनिम्नगाहलिप्रीतिः शर
२५ दिंदुरविपटुत्वं जलाच्छतागस्त्यहंसवृषदर्पाः सप्तच्छदासिताभ्राब्जरुचिः शिखिपक्षमदपाताः हेमंते दिनलघुतामरुवकयवशीतसंपत्तिः ॥ शिशि
रे कुन्दसमृद्धिः कमलहतिर्वीगुडामोदाः ॥ विवाहे स्नानशुद्धांगभूषातूर्यत्रयीरवाः वेदीसंगीतरामादिलाजमंगलवर्णनम् स्वयंवरे शचीरक्षाम
ञ्चमण्डपसज्जता राजपुत्रीनृपाकारान्वयचेष्टाप्रकाशनम् सुरापाने विकलतास्खलनं वचने गतौ लज्जामानच्युति प्रेमाधिक्यं रक्तास्यता
भ्रमः पुष्पावचये पुष्पावचयः पुष्पार्पणार्थने दयिते मालागोत्रस्खलने क्रोधो वक्रोक्ति संभ्रमाश्लेषाः जलकेलौ सरः क्षोभश्चक्रहंसापस
र्पणम् पद्मम्लानिः पयः क्षेपोक्षिरागो भूषणच्युतिः सुरते सात्विका भावाः सीत्काराः कुड्मलाक्षता काञ्चिकंकणमञ्जीररवो रदनखक्ष
ताः विरहे तापनिश्वासचिंतामौनकृशांगताः अब्दसंख्या निशादैर्घ्यं जागरः शिशिरोष्णता मृगयायां चसंचारो वागुरानीलवेषता मृगाधिक्यं मृ
गत्रासो हिंस्रे द्राक्त्वगतित्वरा आश्रमे तिथिपूजैणविश्वासो हिंस्रशांतता यज्ञधूमो मुनिसुताद्रुसेको वल्कलं द्रुमाः पद्मके कोत्सवः प्रातर्मध्या
ह्ने तापसप्लवः सायं सूर्येतिलौहित्यं चक्रपद्मादिविप्लवः पूर्वं त्वग्रतनर्वीप्सकं संधिं आप्तोपवर्णनम् एवं शैशवतारुण्यमाध्यस्थ्यं विषमं च तत्

अन्धकारेतिकाठिन्यं बिम्बलोपसमर्थता आकस्मिकसमारंभोनिःशंकमभिसारिता रसे प्रचुरशाखत्वं दलादर्शितसूर्यता उच्चता प्रसवोत्कर्षो बपः पथिकसेव्यता अभिसारे भयभ्रंशो मञ्जीरादितिरस्क्रिया साहसं रागितोत्कर्षो कालानुगुणवस्तुता ॥ इत्यलंकारशेखरे वर्णनीयमरीचिः नियमान्तरमाह ॥ श्वेताश्चंद्रादयोऽत्रेषा नीलाः श्रीकेशवादयः शोणास्तु सान्ध्यधर्माद्याः पीतादीपशिखादयः धूसरा अथ धूल्याद्याः ज्ञातव्याः काव्यवर्त्मनि ॥ अत्रैवव्रातकं ॥ श्वेतानि चन्द्रशङ्खाभ्रशंभुनारदभार्गवाः हलीशेषाहिशक्रेभसिंहसौधशरद्घनाः सूर्येन्दुकान्तनिर्मोकमन्दारद्रुहिमाद्रयः हिमहासमृणालानिस्वर्गण्डेभरदाभ्रकम् सिकतामृतलोध्राणि गुणकैरवशर्कराः नीलानि कृष्णचन्द्राङ्कव्यासरामधनंजयाः शनिद्रुपदजाकालीराजपट्टविदूरजम् विषाकाशकुहूशल्यागरुपापतमोनिशाः रसाद्भुतशृंगारौ तथा पिकंचराहवः शिखिचाषयमोरसः कण्ठः खञ्जनकेकिनोः कृत्याछायागजाङ्गारः खलान्तःकरणादयः शोणानि सान्ध्यधर्मस्त्रनेत्ररौद्ररसस्तथा चकोरकोकिलापारावतनेत्रं कपेर्मुखम् तेजःपुषरामस्तं च भौमकुंकुमतक्षकाः जिह्वेन्द्रगोपखद्योतविद्युत्कुंजरबिंदवः पीतानि दीपजीवेन्द्रगरुडेश्वरसज्जनाः ब्रह्मावीररसस्वर्णकलिद्वापरोचनाः किंजल्कचक्रवाकाद्याः हरितालं मनःशिला धूसराणि रजोलूताकरभोगृहगोधिकाकपोतमूषकोदुर्गाकाककंठखरादयः

अ०शे० इदमुपलक्षणम्॥ हरिताः सूर्यतुरगा बुधो मरकतादयः इत्यपि बोद्धव्यम् द्वैरूप्ये चाप्रसिद्धो च नियमोऽयमुदाहृतः अन्यद्वस्तु यथा यत्स्यात्तत्तथैवो
२६ पवर्ण्यते॥ इत्यलंकारशेखरे मुक्तादिनियममरीचिः इदानीं नियमांतरमाह एकस्मादासहस्रं च यद्यद्वस्तु यथा भवेत् तत्तत्कविप्रयोगेन ज्ञातव्यं
काव्यमिच्छता॥ अत्रैव ज्ञातव्यम्॥ एक इन्द्रः करी चाभ्रो गजास्यरदमुक्तदृक् दंपत्यनदीतीरनरश्रुतिभुजादिकम् त्रयः कालाग्निभुवनगंगा
मार्गशंभुगुणाः ग्रीवारेखा महीकोणस्तथा शूलशिखावली संध्या पुनः पुष्कराणि राम विष्णुज्वरांघ्रयः चत्वारि वेदब्रह्मास्यवर्णाब्धिहरिबाह
वः स्वर्दंतिदंतसेनांगोपाययाम युगाश्रमाः पंच पांडवरुद्रास्येन्द्रियस्वर्द्रुव्रतादयः महाभूतमहापापमहाकाव्यमहामखाः पुराणलक्षणप्राण
मिलावर्गेन्द्रियार्थकाः षड्गुणकोणत्रिशिरोनेत्रतर्काङ्गदर्शनम् चक्रवर्तीमहासेनवदनानि गुणा रसाः सप्त पातालभुवनमुनिद्वीपार्कवाजिनः
वाराश्वस्वरराज्यांगव्रीहिवह्निशिखादयः अष्टौ योगाङ्गवस्वाशामूर्तिदिग्गजसिद्धयः ब्रह्मश्रुतिव्याकरणदिक्पाला हि कुलाद्रयः नवांगद्वार
भूखण्डक्षत्ररावणमस्तकाः व्याघ्रीस्तनसुधाकुण्डशृङ्गारादिरसग्रहाः दश हस्तांगुली शंभुबाहुरावणमौलयः कृष्णावतारो दिग्विश्वेदेवाव
स्थेन्दुवाजिनः एकादश महादेवाः सेनाक्षकुरुभूपतेः द्वादशार्कराशिमाससंक्रांतिगुहबाहवः शारिकोष्ठकसेनानीनेत्रसभापतिमंडलाः त्र

षोडशास्तुस्तांबूलगुणा अथ चतुर्दश विद्यान्वयमन्त्रश्चैव भुवनध्रुवतारकाः तिथयः स्युः पंचदश षोडशेन्दुकलास्मृताः अष्टादशद्वीपविद्यापु
राणस्मृतिधान्यकम् विंशती रावणभुजा नेत्राद्यथ शतंतथा धार्तराष्ट्राः शतभिषक्तारकापुरुषायुषम् रावणांगुल्यब्जदलं यज्ञपत्राब्धियोजन
म् सहस्रंजाह्नवीवक्त्रं शेषशीर्षाम्बुजच्छदाः रविरश्म्यर्जुनकरवेदशाखेन्द्रदृष्टयः उदाहरणमेतेषांप्रसिद्धत्वान्नलिख्यते ग्रहतेकेवलंपांथा
मादृशाः काव्यवर्त्मनि ॥ इत्यलंकारशेखरे संख्यानियममरीचिः ॥ इदानींप्रकारमुपदिशन्नेव कवीनांप्रकर्षवीजमाह ॥ गतागतं समत्वंच संस्कृ
तप्राकृतैक्यताम् तथा वचनयोः साम्यंधर्मिधर्माभिधापि च कवयः कुर्वते शक्ताः समस्यापूरणादिकम् आदिचतुष्टयंचित्रकाव्योपकारक
म् ॥ तद्यथा ॥ ममरुरुमध्यमसहासकारिकावररववनदानवसरसीरसगजभुजगतरुणीरुतरदसोदरनदभेदनवरभैरवकलपुलकपतदात
पदृस्यादिः चकारादसाम्येकविस्फुटतार्थता राजानदीमालिकाराजतेदीनरक्षीपिनाकिनानन्दनवमसहसात्वनुतइत्यादिः रेजिरेवभूवतिष्ठती
त्यास्यातेसंस्कृतेत्यादि यथा ॥ तत्रपुल्लिङ्गे ॥ हाराहारविहारसारसमयाः संभोगभोगाध्वराः संहारामरवारवारणरणाष्टंहारवीराकराः लोलोल्ला
पविलासवापसह राहंकारहीरांकुरानीहारोरगतारराग तरलागोविन्दकन्दोदनाः ॥ स्त्रीलिंगे ॥ धरणीधारणीगोणीरोहिणीरमणीमणी कंदलीलह

अ॰शे॰ रीर्भानर्तिभेरीवसुधा॥नपुंसके॥जलफलपलमूलंवारिकीलालतूलंवलपललदुकूलेतिंगगंभीरकूलम् सलिलकपलचीरंतुच्छराजीवनीरंहलरज
२७ तकुटीरंवारुनालंपटीरम् भणगच्छदेहिसंहरकुरुरोचयमारयावगच्छेहि अवलोकयावचिन्तयधारयस्वादयेतिधातुजंविद्धि अेकस्मिन्नेवार्थे
बहुवचनैकवचनयोः॥सामान्ययथा॥ क्ष्मादौदेषिरोवारिफलिनोवर्हिणोनरः तादृशोभूरुहाद्याश्चमासपेरवसोमपाः एवंरश्मिमंथानशब्दाःखु
रणशावयः धर्मिधर्माभिधायिपदंयथा सुषिरादिप्रतीहारचुल्लिपिल्लादिशात्रवः स्मेरालसोमत्सरश्चधर्मिधर्माभिधायकाः चकाराद्विशेषसामान्य
वाचकभावाभाववाचकपरिग्रहः॥तदुक्तम्॥शकुन्तधातुमरुतोगरुत्मत्कामदर्शनम् स्वच्छवंधूत्वगमनंचटकाद्याद्विवाचकाः अपिधाना
वधूपाद्विभावाभावप्रदर्शनम् आदिपदात्आरादयुतभिन्नअवतंसादिपरिग्रहः॥इत्यलंकारशेखरेचित्रकाद्युपकारमरीचिः॥ समस्यापूर्ण
त्विकमिति इदंतुकठिनसमस्याभिप्रायेणतदुक्तंकवयः शान्ताः तत्रैवंप्रकारेणयदीदंस्यात्तदेदंस्यात्कर्ताविषयमेतिच अयोग्यः खलुकः शब्दः
कुत्रसंसर्गयोर्नहि प्रश्नोत्तरात्पदेभङ्गात्पूर्वस्मिन्नाद्ययोजनात् मिथ्याभिधाप्यसावेवअेषसार्वत्रिकः क्रमः॥प्रश्नेति॥केमण्डयन्तिस्तन
मण्डलानिकीदृश्युमाचन्द्रमसः कुतः श्रीः किमाहसीतादशकण्ठनीताहारामहादेवरवातमातः॥पदेति॥मृगात्सिंहः पलायते मृगमत्तीति

मृगात् वेपत्नमांसमयइत्यर्थः करणात् पूर्वस्मिन्निति प्रत्यर्थिकीर्तिनिर्जितकज्जलधवलंयावककुसुममिति यावत् यथायथभावान्तरप्रकार
स्तु ओतत्वत्प्रेमपारं दृष्टिविनम्यस्तविलोक्यताम् अपि हमेवत्वं जातमिंद्रजालं विभाव्य प्रबोधयति बालं यथा पो । प्रपूरयेत् सुबोधमिदम् प्र
कारान्तरं देवर्षिवरशापादेर्भविमनोरथादिभिः मनोरथेन तपसा पयसा पुण्यचयेन च मायया शंवरादीनां सर्वं संभावयेत् कविः तत्रादृष्टरूपम् त
पस्त्वात्कालिकं पुण्यम् ॥ शापादस्तु ॥ रागवात्सल्यशोकाद्यैर्विनयेनमदेन च मतिभ्रमेण शौर्येण विपरीतकरः पुमानित्यादि ॥ विशेषस्तु ॥ कस्या
यद्यपाण्डसंसर्गप्रतिबन्धुयणुर्महान् युगान्ते चातिदूरोऽत्र निकटे महदप्यणुः हरेद्र्योमुखत्वे तु विम्बाद्यविपरीतता दृक्पीडनात्तनुर्मूढा द्वा
घनाविम्बतो बहु तमो कार्ष्ण्यादिभिः कार्ष्ण्यं शौक्ल्यं ज्योत्स्नादिकीर्तिभिः लौहित्यं रक्तपीतादिसन्ध्यास्त्रकरादिभिः तिमिरं बहुलाप्रयुक्तचक्षुर्म
यम् इयं वशैलाय तिपिपीलिका इत्यादि मशकायति कुञ्जर इत्यादि विपरीतो भवज्जम इत्यादि एकोऽपि सशतं नृप इत्यादि मषीयति जगत्र
यमित्यादि श्वेतवृणायते जगत् पद्मरागायते जगत् क्रमेणोदाहृत्यम् कासांचित्समस्यानां नानाभुवनसंसर्गित्वात् तत्प्रकाराः प्रदर्श्यन्ते ज
गतः प्रलये भूमियोगी हक्षम्युपोदृती बलीन्द्रो हाटकेशीय पाताले दैत्य रसातले रसातले इति तृतीयाम्बपी ॥ यथा ॥ दौर्विवेनजले शार्ङ्गीत्वब्धि

अ॰शे॰ मंथेद्वयंभुवि भुवीत्युभयान्वयी पातालंवार्णैक्षिप्रेचन्दनद्रुमपन्नगैः ध्वजप्रासादधूलीभिर्भूमिः स्वर्गमुपापयी श्रीकृष्णस्योदरेसर्वसंसर्गःसार्वे
२८ कालिकः पातालंभूमिश्चस्वर्गंययावित्यन्वयः अगस्त्यंभोधिपानादिपौराणिककथाशतैः शिवादिदेवसंचारैस्तादृश्यैस्तत्वेवर्णनम् शिवादीति
यत्रशिवोपातितन्नतत्रान्तरीयकतयासर्यचन्द्रानलादीनामपिगमनमवश्यकमित्यर्थः सादृश्यैरिति लक्षणायास्तूच्यग्रेपर्वतद्वयमित्यादौ
औचित्येनसंग्रामेकुम्भिमुक्ताभिर्दिवातारकितंनभः॥राजशेखरस्तु॥उत्पाटितैर्नभोनीतैः शैलैरामूलबन्धनात् तांस्तानर्थान्समालोच्यसम
स्यांपूरयेत्कविरित्याह॥वृद्धास्तु॥कः प्रत्येति प्रत्ती मोनद्राक्प्रत्येमिप्रतीहिच नहिनोतत्किमित्याद्यैरुक्तिमाश्रित्यपूरयेत्॥तथा॥पराजितश्चे
दुर्गवान्जरासंधेनजंतुना प्रतीतिरद्यमेयातामृगात्सिंहः पलायते मासंभावयशल्येनफाल्गुनस्यपराजयम् कः प्रतीयात्कुरुश्रेष्ठमृगात्
सिंहः पलायतेत्यादि नहिगांडीवकोदण्डोमृगादित्यादि तत्किंकमलपत्राक्षमृगात्सिंहः पलायते सुबोधमखिलम् शब्दानुकूलितेसिंन्धौ
शैलाण्डारैर्विदारिते त्वत्प्रतापाद्द्रवीभूतेस्वर्णाद्रौमलिनेरवौ विरहेसर्वदहनः संतोषेसर्वमेवशशी कामिनिसर्वकाम्यंशान्तेलोष्टायतेविश्वम्
वैशेषिकेषुकाव्येषुगुणेषूत्कृष्टमन्दयोः अपेक्षयाचसंसर्गेस्यातामुत्कृष्टमन्दते वैशेषिकेषुरूपादिपञ्चस्तु काव्येशौर्यौदार्यसौन्दर्यादिषु

अपीकलितकाव्यलक्षणमिमं संक्षेपतः कर्तुमनतिविस्तरमनुसरन्कविः अन्वयैरजहल्लिङ्गैः साधारणविशेषणैः छन्दोज्ञात्वा पृथग्वाक्यैः स्वबुध्यामान
सीमयेत् समस्यापदं वाक्यं स्मर्तव्यम् शिशूनां गतये स्वामिर्दिङ्मात्रमिह दर्शितम् काव्यकान्तारपान्थानामीदृगर्थे कियान्श्रमः॥ इत्यलंका
रशेखरे कविसामर्थ्यरत्नम्॥ रस आत्मेत्युक्तम् तत्र यथात्मानं विना शरीरमप्रयोजकम् तथा रसं विना काव्यम् तथाह साधुपाकेप्यनास्वाद्यं भो
ज्यं निर्लवणं यथा तथैव नीरसं काव्यं न स्याद्रसिकतुष्टये तत्र रसत्वमंगांगिभावापन्नसकलविभावादिसाक्षात्कारकत्वम् विशेषणसमूहालं
बनकारणाय रसत्वं न पि जातिरिति विषयम्॥ केचित्तु॥ कारणेनाथ कार्येण सहकारिभिरेव च व्यक्तत्वं नीयमानस्तु स्थायीभावो रसः स्मृतः कारण
मंगनानवयौवनादि कार्याणि स्तंभः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका मताः सहकारिण उद्यानादयः ग्ला
न्यादयः॥ यदाहुः॥ विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः आरोप्यमाण उत्कर्षं स्थायीभावो रसः स्मृतः॥ तमिदानीं विभजते॥ शृंगारहास्य
करुणरौद्रवीरभयानकाः बीभत्साद्भुतशान्ताश्च काव्ये नव रसाः स्मृताः भक्तिप्रेमस्तु सुखज्ञानात्मरसवादिमतेन भवत्येवेति दिक्॥ तत्र शृं
गारं विभजते॥ संभोगो विप्रलंभश्च शृङ्गारो द्विविधः स्मृतः तत्र स्त्रीपुंसलक्षणे दृष्टप्राप्तौ रतिरेव संभोगः॥ तदुक्तम्॥ अनुरक्तौ निषेवेतां यत्रान्योन्यं

अ॰शे॰ विलासिनौ दर्शनस्पर्शनादीनि संभोगोयमुदाहृतः तत्र नायिकाश्रयसंभोगो यथा॥ शून्यंवासगृहंविलोक्यशयनादुत्थायकिञ्चिच्छनैर्निद्राव्याज
२९ मुपागतस्यसुचिरंनिर्वर्ण्यपत्युर्मुखम् विस्रब्धम्परिचुम्ब्यजातपुलकामालोक्यगंडस्थलींलज्जानम्रमुखीप्रियेणहसताबालाचिरंचुंबिता अलो
कालमनमुखीसन्वयः॥नायिकाचतुर्द्धा॥अनूढाचस्वकीयाचपरकीयावराङ्गना त्रिवर्णिनः स्वकीयास्यादन्याः केवलकामिनः॥ तत्र॥अनुरक्ता
कुलीनस्वयंवासीकृताभवेत् सानूढेतियथाराज्ञोदुष्यन्तस्यशकुन्तला देवतागुरुसाक्ष्येणस्वीकृतास्वीयनायिका परकीयाप्यनूढेवविशेष
स्तुस्फुटस्तयोः सामान्यवनितावेश्याभवेत्कपटपण्डिता नहिकश्चित्प्रियस्तस्यादातारंनायकंविना अस्याः प्रकाशोऽन्यासांप्रच्छन्नोरमण
इतिविशेषः ताश्चाष्टधा स्वण्डितोत्कण्ठिताप्रोष्यत्पतिकाचाभिसारिका कलहांतरितावासकसज्जाविप्रलब्धिका स्वाधीनभर्तृकाचान्याक्त
लोप्यष्टधामताः नायकाश्रयोयथा॥त्वंमुग्धाक्षिविनैवकञ्चुलिकयाधत्सेमनोहारिणींलक्ष्मीमित्यभिधायिनिप्रियतमेतद्वीटिकांसंस्पृशि श
य्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितोनिर्यातः शनकैरलीकवचनोपन्यासमालीजनः रूपसौभाग्यसंपन्नः कुलीनः कुशलोयुवा॥
अनुद्धतःसत्यवाक्नायकः प्रीतयेस्त्रियः अयंबहुप्रकारोपिसंक्षेपेणचतुर्विधः॥अनुकूलोदक्षिणश्चशठधृष्टौचतेयथा लीनरागोनुकूलः

स्यादनन्यरमणीरतः दक्षिणस्त्वन्यवनितापि यः स्यादविकृतः स्त्रियाम् प्रियं वक्त्यप्रियं तस्याः कुर्वन्नविकृतः शठः धृष्टो ज्ञातापराधोऽपि न विल
क्षोऽवमानितः॥ विप्रलम्भस्तु॥ भावो यदा रतिर्नाम प्रकर्षमधिगच्छति नाधिगच्छति चाभीष्टं विप्रलंभः स उच्यते अभीष्टं स्त्रीपुंसलक्षणमेव स
च पूर्वानुरागमानप्रवासकरुणात्मकः विप्रलम्भश्चतुर्धा स्यात्पूर्वपूर्वो ह्ययं गुरुः॥ तत्र॥ स्त्रीपुंसयोर्नवालोकादेवोल्लसितरागयोः ज्ञेयः पूर्वा
नुरागोऽयमप्राप्तौ रतिकामयोः॥ यथा॥ प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयास्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्म
यि यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणादाशंसापरिकल्पितास्वपि भवत्यानंदसान्द्रो लयः अथान्यावनिताशक्तमवगम्य स्ववल्ल
भम् ईर्ष्यावशेन वैमुख्यमेष मान उदाहृतः॥ यथा॥ सा पत्युः प्रथमापराधसमये सख्योपदेशं विना नो जानाति सविभ्रमाङ्ग-वलनावक्रो
क्तिसंसूचनम् स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः प्रवासः परदेशस्थेऽद्वितीये
विरहोद्भवः यथा॥ त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् अस्रैस्तावन्मुहुरुपचितैर्दृष्टि
रालुप्यते मे क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः॥ इत्यादि॥ स्यादेकतरपंचत्वे दंपत्योरनुरक्तयोः शृङ्गारः करुणाख्योऽयमजस्येव रतेरि

अ०ओ० व नमुशृङ्गारस्यरतिप्रकृतिकत्वात्तस्याश्चसुखसंवेदनरूपत्वात्तस्यचविप्रलंभेऽभावात्कथंशृङ्गारभेदइतिचेन्नधन्योहमस्याःकृतेदशामि
३० मामनुभवामीतितत्रापितदभिधानात् कवित्तसंभोगपोषकत्वेनस्पृहणीयत्वाद्योतितंविस्तृतंमयैवत्वाकरले॥श्रीपादस्तु॥रतिर्भवतिदेवा
दौमुनौपुत्रेनृपेगुरौ शृङ्गारस्तुभवेत्सैवयाकान्ताविषयारतिः॥तत्रदेवेयथा॥कण्ठकोणविनिविष्टमीशतेकालकूटमपितेमहामृतम् अप्सु
पात्तममृतंभवद्वपुर्भेदवृत्तिपदियेनरोचते॥मुनौयथा॥हरत्यघंसंप्रतिहेतुरेष्यतःशुभस्यपूर्वाचरितैःकृतंशुभैः शरीरभाजांभवदीयदर्श
नंव्यनक्तिकालत्रितयेपियोग्यताम्॥पुत्रे॥एह्येहिवत्सरघुनंदनपूर्णचंद्रचुंबामिमूर्द्धिसुचिरंचपरिष्वजेत्वाम् आरोप्यवाहृदिदिवानिशं
मुद्वहामिवन्देयवाचरणपुष्करकद्वयंते॥नृपेयथा॥तेकौपीनधनास्तएवहिपरंधाम्नीफलंभुंजतेतेषांद्वारिमदन्तिवाजिनिवहास्तैरेवलब्धा
क्षितिःतैरेतत्समलंकृतंनिजकुलंकिंवाथबहुब्रूमहेयेदृष्टाःपरमेश्वरेणभवतातुष्टेनरुष्टेनवा॥गुरौयथा॥हातातविश्वजनवत्सलमामकी
नजीवितधनमणिवंशवतंसभूत स्वांचेदुर्वत्कुलजसद्मनिचेटकःस्यांयद्वाभवच्चरणपंकजरेणुरेव हासमूलःसमाख्यातोहास्यनामार
सोबुधैः चेष्टाङ्गवेषवैकृत्याद्धास्योहास्यस्यचोद्भवः कपोलासिकृतोल्लासोभिन्नोष्ठःसमहात्मनाम् विदीर्णास्यस्वमध्यानामधमानांसशब्द

कः ॥ यथा ॥ मधुसमयमिति ज्ञात्वा प्रियायै प्रेषितं मनः तच्च तत्रैव रमते हताः पाणिनिना वयम् शोकात्मः करुणो ज्ञेयस्तत्र भूपातुरोदनं वैवर्ण्य
मोहनिर्वेदप्रलपादृक्विवर्णयेत् ॥ यथा ॥ मेदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां करु
णा रुणद्धि नो ॥ क्रोधात्मको भवेद्रौद्रः क्रोधः प्रोक्तश्च वैरिणः भीष्मवृत्तिरसामान्यो भवेदुग्रक्रियामयः स्वांसघातस्वयंशस्त्रोत्क्षेपभ्रुकुटयस्त
था अन्याप्तिजनाक्षेपोद्दलनं चोपवर्ण्यते ॥ यथा ॥ कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः नरकरिपु
प्या सार्द्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् उत्साहात्मा भवेद्वीरो बलशास्त्राभ्यपस्वसः नायकोऽत्र भवेत्सर्वै
श्लाघ्यैरभिमतो गुणैः ॥ यथा ॥ क्षुद्राः संत्रासमेते विजहत हरयो भिन्नशक्रेभकुंभा युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः सौ
मित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः किंचिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि भयानको भवेद्भीतिप्रकृतिर्घोरव
स्तुनः सच प्रायेण वनितानीचबालेषु दृश्यते दिगालोकास्यशोषाङ्गकम्पाद्यसंभ्रमाः स्तंभवैवर्ण्यमीहाश्चवर्ण्यन्ते विबुधैरिह ॥ यथा
ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् शष्पैरर्द्धावलीढैः श्रमविवृ

अ०शे० ममुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति वीभत्सः स्याज्जुगुप्सातः सोऽहृद्यश्रवणेक्षणात् निष्ठीवनास्यभं
३१ गाक्षिसंकोचनमहतानच ॥ यथा ॥ उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रगंधीनि
जग्ध्वा आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्कादङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति विस्मयात्माद्भुतो ज्ञेयः
सत्यासंभाव्यवस्तुनः दर्शनाच्छ्रवणाद्वापि प्राणिनामुपजायते तत्र नेत्रविकारः स्यात्पुलकः स्वेद एव च निस्पन्दनेत्रता साधुसाधुवादास्तथाम
ताः चित्रे कनकलतायां शरदिन्दुस्तत्र खंजनद्वितयं तत्र च मनोजधनुषी तदुपरि गाढांधकाराणि सम्यग्ज्ञानसमुत्थानः शान्तो निःस्पृहनाय
कः रागद्वेषपरित्यागे सम्यग्ज्ञानस्य चोद्भवः पश्चात्तापः शरीरादिप्यावहस्तु विडंवनम् विवेकचित्तस्थैर्यादियोगाद्यास्तस्य लक्षणं ॥ यथा ॥ अ
हौ वा हारे वा कुसुमशयने वा दृषदि वा मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः क्वचित्पुण्यारण्ये
शिव शिव शिवेति प्रलपतः [illegible]समूहः अत्राहिर्विषहारोऽहेयो न तु हारवदहिरप्युपादेय इति बोद्धव्यम् अत्र सर्वत्र तत्तद्रसत्वमात्रे उदाह
रणमिति स्मर्तव्यम् इदानीं रसानामविरोधविरोधावाह शृङ्गारहास्यौ करुणवीभत्सौ वीररौद्रकौ भयानकाद्भुतौ मित्रे मिथः शान्तो नकस्य

चित् शान्तेऽकरुणबीभत्सौ न स्थिरो हि द्विचाद्भुतः शृङ्गारे वीरकरुणौ हास्यकरुणौ रिपुः अत्र करुणबीभत्सयोर्मैत्री विशेषाभिप्रायेण स्मर्तव्यम्॥
स्थायिभावानाह रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा जुगुप्साविस्मयौ भावा निर्वेदः स्थायिनो नव स्थायिनो भावा नवेत्यर्थः
ननु निर्वेदस्य कथं शान्तरसस्थायित्वमभिचारित्वादिति चेन्न अधिकरणभेदेनोभयाविरोधादित्यन्यत्र विस्तरः स्थायिलक्षणं तु विरुद्धैरविरुद्धै
र्वा भावैर्विच्छिद्यते न यः आत्मभावं नयत्यन्यान् स्थायी भावः स उच्यते यथा लवणाकरः विरुद्धैर्जुगुप्सादिभिरविरुद्धैरित्यादिभिर्यो न विच्छिद्यते
॥ विशेषलक्षणं तु ॥ मनोनुकूलविषयसुखात्मकं संवेदनं रतिः अङ्गक्रीडादिभिश्चेतोविकारो हासः इष्टनाशादिजनितं चित्तवैक्लव्यं शोकः प्र
तिकूलेषु तैक्ष्ण्यप्रबोधः क्रोधः कार्यारम्भेषु स्थिरसंरम्भ उत्साहः व्याघ्रादिदर्शनादिजनितं मनःक्लैव्यं भयम् दोषदर्शनात्पदार्थगर्हणं जुगुप्सा लो
कसीमातिक्रान्तपदार्थविषयश्चित्तविकारो विस्मयः तत्त्वज्ञानादीर्ष्यादिभिः स्वावमाननं निर्वेदः एते च सर्वभावेषु मुख्याः यदाह॥ यथा नराणां
नृपतिः शिष्याणां च यथा गुरुः तथा सर्वेषु भावेषु स्थायी भावः स्मृतो महान् विभावो द्विविधः उद्दीपन आलम्बनश्च तत्र कोकिलवसन्तादिरुद्दीप
नः नायिकादिरालम्बनः येनादपि अस्माकं मते रत्यादिकमनुभावत्वादिकं जातिरेव नहि वैशेषिकादिवदस्मत्तन्त्रक्रियेति॥ अनुभावलक्षण

 न्तु॥ अनुभावो विकारस्तु भावसंसूचनात्मकः॥ तत्र॥ हेलाविच्छित्तिविब्बोककिलकिंचितविभ्रमाः लीलाविलासो हावश्च विस्रेपो विहृतो मदः
 मोट्टायितं कुट्टमितं मौग्ध्यं च तपनं तथा ललितं चेत्यमी हावाश्चेष्टाः शृङ्गारभावजाः एतच्चास्माभिरेव प्रपंचितमन्यत्र॥ सात्विकलस्तु॥
विशेषेणाभितः कायं स्थापिनं भावयन्ति ये अनुभूतादिहेतूंस्तान्वदन्ति व्यभिचारिणः आदिपदात्स्वेदादिपरिग्रहः तेच निर्वेदग्लानिशं
काख्यास्तथासूयामदश्रमाः आलस्यं चैव दैन्यं च चिंतामोहस्मृतिर्धृतिः व्रीडा चपलता हर्ष आवेगो जडता तथा गर्वो विषाद औत्सुक्यं निद्राप
स्मार एव च सुप्तं विबोधोमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः अमी
त्रयस्त्रिंशद्भावास्तेषु कश्चित्सर्वभावतापि यथाक्वाकार्यं शशलक्ष्मण इत्यादौ अत्र क्वाकार्यमिति वितर्कः भूयोपि दृश्येत सेत्यौत्सुक्यम् दोषाणा
मिति मतिः कोपः प्रीतिस्मृतिः किंवक्ष्यतीति शंकास्वप्नेपि सा दुर्लभेति दैन्यम् चेतः स्वास्थ्यमुपैहीति धृतिः कः खल्वित्यादि चिन्ता॥ इत्यलंका
रशेखरे रसमरीचिः॥ परे रसदोषाभावानुकूलवर्णादयः काव्यशरीरमनइत्युक्तमतो रसदोषानिदानीमाह॥ स्वस्वशब्देरुपादानं भावस्य वा रस
स्य च कष्टप्रकल्पनीयत्वमनुभावविभावयोः प्रकृतेरसवैरित्वन्तेषां व्यक्तिविपर्ययः अनौचितीत्यसर्वत्र रसे दोषाः स्युरीदृशाः सामान्यतो

विशेषतो वा स्वस्ववाचकशब्दप्रतिपादकानां निर्वेदादीनां स्थ्यादीनां वा रसाननुगुणत्वमिति सकलानुभवसिद्धं॥ तत्र व्यभिचारिणः स्वस्वशब्दोपा
दानम् यथा॥ सव्रीडादर्पितानने सकरुणा मातङ्ग चर्म्माम्बरे सत्रासा भुजगे सविस्मयरसा चंद्रेमृतस्यन्दिनि सेर्ष्या जह्नुसुतावलोकनविधौ दीना
कपालोदरे पार्वत्या नवसंगमप्रणयिनी दृष्टिः शिवायास्तु वः सव्रीडानयननिपातनात् अत्र व्रीडादीनां स्वस्वभावप्रतिपादितानां चमत्कारज
नकत्वस्य सहृदयसाक्षिकतया तदभावे रसभंग इत्युचितम् एतदेव प्रत्युदाहरणं प्रतिपादयन्ति ध्यानव्यादर्पितानने मुकुलिता मातङ्ग चर्म्मा
म्बरे सोत्कम्पा भुजगे निमेषरहिता चन्द्रे मृतस्यंदिनि मीलद्भ्रूः सुरसिन्धुदर्शनविधौ म्लाना कपालोदर इत्यादि॥ स्थायिनो यथा॥ संप्रहारैः प्र
हरणैः प्रहाराणां परस्परम् झणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोप्यभूत् संप्रहारः संग्रामः अत्रोत्साहस्य रसस्य रसशब्दस्य प्रतिपादित
स्य रसाजनकत्वम् यथा॥ तामनङ्गजयमंगलश्रियं किंचिदुच्चभुजमूलशोभिनीम् नेत्रयोः कृतवतोस्य गोचरे कोप्यजायत रसो निरन्तरः शृ
ङ्गारितप्रतिपादितस्य यथा॥ आलोककोमलकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिराममूर्तिम् पश्यैष बाल्यमतिवृत्य विवर्तमा
नशृङ्गारसीमनि तरङ्गितमातनोति॥ अनुभावस्य कष्टकल्पनीयत्वं यथा॥ कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यू

अ०शे० नः लीलाशिरोंऽशुकनिवेशविशेषक्लृप्तिर्व्यक्तस्तनोन्नतिरभून्नयनावनौ सा अत्रचन्द्रोदयउद्दीपनविभावः शृङ्गारयोग्यानुभावप्रतीत्यास्वा
३३ दनापर्यवसायिनः स्थिताः यद्यप्यंशुकनिवेशोऽनुभावत्वयोग्यस्तथापि तस्य नव्यक्तिप्रयोजकत्वेनोपादानादनुभावत्वापर्यवसानम्॥ य
द्यप्युन्निद्रमेव शृङ्गारः प्रतिपिपादयिषितः अभून्नयनावनौ सेत्यनेन तस्यैवालम्बनत्वप्रतिपादनात् नच पुंसि कश्चिदनुभावउपात्तः नच
विभावैराक्षेपोऽर्हद्विकटेन कल्पनीयः॥ विभावस्य यथा॥ परिहरति रतिं मतिं लुनीते स्खलतितरां परिवर्तते च भूयः इतिवत विषमा दशास्य
देहं परिभवति प्रसभं किमत्र कुर्मः इत्यनेन प्रकारेणास्य दशा देहं परिभवति इत्यन्वयः अत्र रतिपरिहारादीनामनुभावानां करुणादावपि
संभवनात्कामिनीरूपो विभावोऽप्यत्र प्रतिपाद्यः प्रकरणादिसापेक्षत्वात्॥ प्रकृतरसविरोधिविषयको विभावादिः॥ तत्र विभावव्यभिचा
रिणामुदाहरणम् यथा॥ प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः निधानं सौख्यानां क्षणमभिमुखं
स्थापय मुखं न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः अत्र शृङ्गारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशनरूपोऽनुभावः तत्र प्रकाशितो निर्वेदस्य
व्यभिचार्युक्तियुक्तेः शान्ते निर्वेदस्य स्थायित्वात्॥ व्यक्तिविपर्ययइतिपद्यस्यैतत्पद्दूषणमनुचितं चेति॥ तत्र तद्दूषणम्॥ व्यक्तयो दिव्याः अदिव्या

दिव्यादिव्याश्च तत्रादिव्यत्वममर्त्यैकरूपकता यथा॥ शिवादेः शेषादेः अदिव्यत्वं यथा माधवादेः दिव्यादिव्यत्वं श्रीकृष्णादेः त्रिविधा अप्येते चतु
र्विधा भवंति वीररौद्रशृंगारशांतरसप्रधानाः धीरोदात्तधीरोद्धतधीरललितधीरप्रशान्ताः यथा॥ रामभार्गवश्रीकृष्णजीमूतवाहनाः एते चोत्त
ममध्यमाधमभेदाद्बहवो भवन्ति तत्र स्वः पातालगमनसमुद्रोल्लङ्घनपर्वतस्फोटनाद्युत्साहो दिव्येष्वेव वर्णनीयः अदिव्येषु तु यावदेवलो
कप्रसिद्धमुचितं तावदेव वर्णनीयम् अनौचितीच महान् सदोषः स च भवानीशंकरादीनां पित्रोर्वा केलिवर्णनम् अस्युक्तिर्वा नभःस्तम्भस्त
नाद्यचित्यनौचिती इत्यनेनाऽस्तिवर्णनम् यद्यपि कुमारसम्भवे कालिदासेन वर्णितम् तथाप्यर्वाचीनैर्न कर्तव्यम् नहि गजादीनामुदर्य
स्वेनावटकाष्ठमश्नीतेपचतीत्यस्मदादीनामुदर्येण तैजसा तथा भवितव्यमिति न्यायात् तस्यापि दोषत्वाद्दादोषान्वक्तुम्वदन्ति दोषेष्व
तिविवेकोः शुकविलोकविलोचने काव्यमीमांसिकप्राप्तमहिमा महिमा हतः॥ यदाह महिमा॥ अनौचित्यादृते नान्यद्रसभंगस्य कारण
म् प्रसिद्धौचित्यमूला हि रसस्योपनिषत्परा इदृशा इत्यनेनान्येनौचित्यहेतवो दोषा भवन्तीति दर्शितम्॥ यथा॥ नायिकापामानादिना च
रणप्रहारादिना वा नायकस्यात्यन्तिककोपादिवर्णनम् व्यक्तिविपर्ययानौचित्ययोरवान्तरभेदविवक्षया भेदः अमीषां कविदोष

अ॰ ८ तापि यत्र नरसहानिर्भवति तद्यथा सहृदयैरेव पर्य्यालोचनीयमिति ग्रंथगौरवभयान्नेह तन्यत इति॥ इति श्रीमाणिक्यचन्द्रविरचिते लंका
३४ रशेखरे रसदोषमरीचिः॥ उद्दामा वीररौद्रादौ कंदरीत्यात्वरादयः हृद्याः शृङ्गारहास्यादौ परयोर्मध्यमा गतिः इदानीमनुकूलान्वर्णनीयाना
ह शृङ्गारादावित्यादिपदेन भयानकस्य हास्यादावित्यत्र करुणस्य परिग्रहः परयोर्वीभत्साद्भुतयोः शान्तस्य नियमो नास्तीति हृदयम्॥ उद्दामेति च
न्द्र-वंडकटंसिखधरादिरीतिर्गौडी असरेषु श्रीपादः उद्दामाः स्वान्तरालेन सजातीयेतरेण च योगाद्याश्चैव चत्वारः शेषा विकटगुम्फना हृद्या
उपेन्द्रादि कंदद्दरीतिर्वैदर्भी असरेषु पुनः स्तु एवं न सो चलध्वन्तरीतौ न श्चोपर्य्यनुनासिकः असमासोऽप्य सोऽल्पो वा हृद्यं स्यात्तं धिसैरव
तः॥ यथा॥ अनङ्ग-रङ्ग-प्रतिमं पदङ्ग-भङ्गीभिरङ्गीकृतमानताङ्ग्याः कुर्वन्ति यूनां सहसा यथैवास्त्वान्तानि शान्तापरचिन्तितानि अत्र वैपरीत्यं दोषा
येतिमनसिकृत्वाह क्वचिद्दोषतामाह वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित्क्वचित् रचनावृत्तिवर्णानामन्यथात्वमपीष्यते॥ यथा॥ मन्थायस्त
र्णवाम्भः प्लुतकुहरचलन्मन्दरध्वानधीरः कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनि
र्घातवातः केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् भेरीशतसहस्राणि ढक्काशतशतानि च एकदा यत्र हन्यन्ते कोणाघातः स उ

यतेअत्रहिवाच्यमुद्दामंप्रबंधत्वात् प्रबंधस्याभिनेयत्वान्नतथा किन्तुवक्ताभीमसेनइति तदौचित्यादुद्दामावर्णाद्यः क्वचिद्वाच्यौचित्यात्
यथाशंकुव्याकीर्णरङ्कुद्रुतनिशितशरस्तुण्डदीप्तत्तरस्तुज्याघोषस्तुब्धकण्ठीरवखरवचकितव्यस्तमातंगयूथम् खड्गव्यालूनखड्गंतुमुलकल
कलप्रान्तकूजच्छकुन्तेभल्लध्वस्ताच्छभल्लंवनभुविमृगयाकर्मतेनप्रतेने अत्रहिवाच्यस्यसर्वप्राणिविप्लवात्मकमृगयायाएवतथात्वात्त
त्त्वम् क्वचित्प्रबंधौचित्यात्॥यथा॥कादम्बर्यादौशृङ्गारेपिनमसृणावर्णाइतिदिक्॥सर्वसाधारणंदोषमाह॥गृहीतमुक्तकोनेष्टोहरवाणा
मरोषिता मात्राभेदोप्यतः स्वाप्यः पदेप्येषसुभावहः एकस्यपदस्यशेषेयोवर्णः सोपरस्याद्येनदीयते यथा॥नाककलाहकाररेफचकार
णासुतराम्॥यथा॥प्रवाहहरितादूर्वाविवाहरसितंतथा स्फूर्जत्काचवयाभूमिर्भूयः पुण्यैरवाप्यते मात्राभेदेपिस्वल्पोदोष नाककादम्बि
नी पदेत्वेषणनदोषः किन्तुगुणः॥यथा॥वन्दामहेमहेशानइत्यादौ अन्यदप्याह रलयोश्चवर्णस्यशैथिल्यायैवभूरितारेफलकारववर्ग
णांभूयस्त्वंशैथिल्यहेतुतयारसहानिकरमित्यर्थः॥संयोवर्णदोषमाह॥रसहास्तादतिहृद्येनमशरहा हाहकारश्चकचतयशराशकका
रादधरादेश्चायभूयसंयोगाः तात्सकारात् कात्ककारात् अधराअधोवर्त्तिनः अतिहृद्ययोः शृंगारहास्ययोः रसयोर्दोषायभवन्ति शब्द

अ०शे० [illegible]स्यान्वयबोधविरोधिता अस्यतुतस्मिन्नपिरसहानिरितिविशेषः अनैकान्तिकबाधयोरिवानुमितौ अतद्भिन्नेतरदितिरहस्यम् भू
३५ पसौवर्णनोपयोगः कार्ण्यादिपदेश्रुतिमेवान्यथाकारमसूराणिकियन्त्यपि काव्यालंकारविद्याभ्यासोद्योदनिरसूत्रयत् उपक्रमोदोषगुणा
लंकारोः सवर्णकः संप्रदायः कवेस्तस्यसामर्थ्यमप्यविभ्रमः अष्टौरत्नानिदीप्तानिसंत्यलंकारशेखरे चत्वारः स्युरलंकारेसंप्रदायमरीच
यः सामर्थ्येद्वौपरस्मिंस्तुपंचकेस्युरूलय मामकीनांकृतिमिमांद्वेषतोदूषयन्तिये काव्यवार्तानजानन्तितेनूनंपांशुलाः स्मृताः आस्तेयद्यपि
पूर्वपण्डितकृतव्याख्यैवसंख्यावतामानन्दायतथापिकेशवकवेर्वाचामियंगुम्फना व्याख्यासौष्ठवशब्दलाघवमिथः सबन्धपूर्वापरप्रत्य
यप्रतिबंधनिर्मलगुणाः कुत्राप्यसौलभ्यताम् तर्कप्रौढमतिः प्रशस्तकवितावल्लीवसन्तोत्सवः कोप्यव्याकरणप्रपंचचतुरोऽलङ्कारपा
रङ्गमः श्रीमत्केशवमिश्रमद्भुतगुणाबासंनियुज्यस्वयंचक्रेशक्रसमप्रबन्धममलेमाणिक्यचन्द्रोनृपः॥ इतिश्रीमन्महाराजमाणिक्यचन्द्र
कारितकेशवमिश्रकृतौलंकारशेखरेविश्रामरत्नम्॥ शास्त्रगोकुलचन्द्रस्यश्रीमन्नालालशर्मणा॥ यत्नात्पुस्तमयंप्राप्यशिलावर्णैःसुशोधितैः
श्रीमद्द्विजवरकमलदिवाकरेणगणेशशर्मणाशोधितोयम्मानमंदिरसन्निधौवाराणसीसंस्कृतयन्त्रालयेऽलंकारशेखराख्योऽयंग्रन्थोमुद्रितःसंवत१९२२

अ०शे०सू०
३८

अ०शेमू

३९

इत्यलङ्कारशेखरः समाप्तः